पञ्चम उच्छ्वासः।

प्रमतिचरितम्।

सोऽपि प्रणम्य विज्ञापयामास। देव देवस्यान्वेषणाय दिक्षु भ्रमन्नहमप्यापि विन्ध्यपार्श्वरूढस्य वनस्पतेरधः परिणतपतङ्गबालपल्लवावतंसिते पश्चिमदिगङ्गनामुखे पर्णतल्पमध्युष्योपास्य सन्ध्यां तमःसमीकृतेषु निम्नोन्नतेषु सन्नमन्दमः श्यामायां किसलयैः स्वपरच्छय्य शय्यां शिशयिषमाणः शिरसि कृताञ्जलिः यस्मिन् वनस्पतौ वसति देवता सैव मे शरणमस्तु शरारुश्वापदाचारभीषणायां शर्वरीगणग्रामशाम्बरान्धकारपूराम्भसि गभीरमकरायामस्यां महाटव्यामेकाकिनो मे प्रसुप्तस्येत्युपधाय वामभुजमशयिषि। ततः क्षणादेवातिदुर्लभेन स्पर्शेनासुखायिषत किमपि गात्राणि आह्लादयिषतेन्द्रियाणि अन्यमनायिष्ट चान्तरात्मा विनिद्रतया हृषितास्तनूरुहाः। पर्यस्फुरच्चे दक्षिणभुजः। कथञ्चिदनितिमन्दमन्दमुन्मिषन्नपश्यं च चन्द्रातपच्छेदकल्पं शुक्लांशुकवितानमैक्षिषि। वामतो वलितदृष्टिः समया सौधभित्तिं चित्राम्बरशय्याशायिनमतिविश्रब्धप्रसुप्तमङ्गनाजनमन्वग्रहम्। दक्षिणतो दत्तचक्षुरग्रगलितस्तनांशुकाम् अम्लानपीनपटलपाण्डुरशयनशायिनीम् आदिवराहदंष्ट्रांशुजालच्छायाम् अंसस्रस्तदुकूलसामरदुकूलोत्तरीयां भयसाध्वससमूर्च्छितामिव धरणीम्

अधराधरमणिकिरणावलिकिसलयनासाश्वासहेतुभिराननारविन्दपरिम-
लोलाहिभिर्मिलिन्दबालसमासरिद्भिरीश्वरेक्षणदहनदग्धं स्फुलिङ्गेन
सनङ्गमिव सञ्जीवयन्तीम् अत्यासुमधुपट्पदमण्डलमिव जातनिद्रमा-
मीलितलोचनेन्दीवरमाननं दधानाम्, ऐरावतमदावलेपमूलापविद्धा-
मिव नन्दनवनकल्पवृक्षरत्नमञ्जरीं कामपि तरुणीमालोकयत् । अत-
र्मथ्य इव गता सा महाटवी कृतहृदमूर्च्छाङ्कुरकपालसम्पुटोऽभेदि
मन्मथाक्षिप्तमनस्त्वोल्लेखं सोढमागतं इव च तदरण्यकामीसमालीवे
पल्लवशयनं कृतस्यचेदमिन्दुगभक्तिसम्भारभासुरं हंसतूलदुकूल
शयनम् । एष च को नु प्रोतदभिकिरणाङ्कुरोत्थापरिक्षतमूर्च्छितं
इवाक्षरोगतः चिरसुप्तः सुन्दरीजनः का चेयं देवीचारविन्दहस्ता
शारदशशाङ्कमस्वच्छामलदुकूलोत्तरच्छदमधिशेते शयनतलम् । न
तावदेषा देवयोषा यतो मन्दमन्दमिन्दुकिरणैः संवाह्यमाना कम-
लिनीव निद्राति भ्रमरकलापुरतरसबिन्दुप्रायचितं पाकपाण्डु चूतफल
मिवोद्भिन्नस्वेदरेखं गण्डस्थलमालक्ष्यते अभिनवयौवनविदाहनिर्भरो-
ष्मणि कुचतटे वैवर्ण्यमुपैति वर्णकः वाससी च परिभोगानुरूपं धूस-
रिमाणमादर्शयतः तदेषा मानुष्येव दिष्ट्या चानुच्छिष्टयौवना यतः
सौकुमार्यमागताः सन्तोऽपि संवृताङ्गावयवाः प्रकाशस्थलमपि प्रायः
तानुविदेव देहच्छविः दन्तपीडामनभिज्ञतया नातिविप्रदरागो मुखे
विद्रुमद्युतिरधरमणिः अनल्पपूर्णमारसमूर्त अम्लानमुकुलमिव
कठोरं कपोलतलम् अनङ्कुशायामलतनुताम्रकुच विम्बमधुरं
सुप्यत नवीनदन्ताग्रस्पर्शं निर्दयविमर्दविकारिमुखस्तनयुगलम् अस्ति
चानतिकम्पशिष्टमर्मार्द्रचेतसो ममास्यामासक्तिः आसन्नप्रत्युक्तं पुन-
राशिषा यदि स्पष्टमात्तं रवेरेव सह निद्रां मोक्ष्यति अथाहं न
शक्नोमि चानुपाश्लिष्य शयितुम् अतो यद्भावि तद्भवतु भाग्यमत्र
परीक्षिष्यइति स्पृष्टास्पृष्टमेव किमप्याविष्कृत्य तामसाध्वसं शयनसुप्तः
स्थितोऽस्मि । सापि किमप्युत्कम्पिता रोमोद्भेदवता वामपार्श्वेन सुखा-
यमानेन मन्दमन्दविजृम्भिकारम्भमन्थराङ्गी लघुहृदयप्रकम्पोत्फु-

घोरस्तसतान्तरालवक्षा नातिपक्ष्मनिमीलनक्षमायितलोलाकुपरभागेण भुजेन
नेत्रदुन्मिषन्ती चासविलासवच्चर्यरागप्रवृत्तविलासविभ्रमसंज्ञितानि
क्रीडान्तराणि कानि कान्यपि कामिनाकुलानुभावेनावस्थान्तराणि
कार्यमाणा परिजनप्रबोधनोचता गिरं कामावेशपरवशं हृदय
मङ्गानि च साध्वसायाससम्भ्रममानसं दप्पुलकानि कथंकथमपि नि-
गृह्य सस्पृहेण मधुरकूणितत्रिभागेण मन्दमन्दप्रचारितेन चक्षुषा
मदङ्गानि निर्वर्ण्य दूरोत्सर्पितपूर्व्वकायापि सन्निद्रेव शयनतले
सचकितमशयिष्ट अजनिष्ट मे रागाविष्टचेतसोऽपि किमपि निद्रा।
पुनरननुकूलस्पर्शदुःखायमानगात्रः प्राबुध्ये प्रबुद्धस्य च सैव मे
महाटवी तदेव तरुतलं सएव पत्रास्तरो ममाभूत् विभावरी च
व्ययासीत्। अभूच्च मे मनसि किमयं स्वप्नः किं विप्रलम्भो वा
किमियमासुरी दैवी वा कापि माया यद्भावि तद्भवतु नाहमिदं
तत्त्वतो नावबुध्य मोक्ष्यामि भूमिशय्यां यावदायुरस्यै देवतायै
प्रतिशयिष्यामीति निश्चितमतिरतिष्ठम्।

अथाविर्भूय कापि रविकराभितप्तकुवलयदामताम्राङ्गयष्टिः
क्लिष्टनिवसनोत्तरीया निरलक्तकरूक्षपाटलेन निःश्वासोष्मजर्जरित
त्विषा दन्तच्छदेन वमन्तीव कपिलधूमधूमं विरहानलम् अनवरत
सलिलधाराविसर्जनात् रुधिराक्षेपमिव लोहिततरं द्वितयमक्ष्णो-
रुद्वहन्ती कुटिलचारिमबन्धनपाशविभ्रमैकवेणीभूतेन केशपाशेन
नीलांशुकचीरचूलिकापरिवृता पतिव्रतापताकेव सञ्चरन्ती श्याम-
श्यामापि देवतानुभावादनतिक्षीणवर्णावकाशा सीमन्तिनी प्रणिपतन्तं
मां प्रहर्षोत्कम्पितेन भुजलतायुगेनोत्थाप्य पुत्रवत्परिष्वज्य शिर-
स्युपाघ्राय वात्सल्यमिव स्तनयुगलेन स्तन्यच्छलात् प्रक्षरन्ती शिशि-
रैरश्रुभिः निरुद्धकण्ठी खेदमदूरं चाचक्षीत् वत्स यदि वः
कथितवती मगधराजमहिषी वसुमती मम श्वश्रूस्ते वामकर्णपार्श्वं
निधाय कथाञ्च काञ्चिदात्मभर्तुः पुत्रमशेषजनानुबद्धां राजराजप्रव-
र्त्तितां ज्ञात्वा त्वद्वृत्तान्तमादाय मा विभेदस्येति साहमस्मि वे।

जननी पितुर्मे धर्म्मपालसूनोः सुमन्त्रानुजस्य कामपालस्य पादमूला-
त्तिरस्काररोषोपक्षुभिताशया प्रोष्यानुशयविधुरा स्वप्ने केनापि रक्षो-
रूपेणोपेत्य प्रमाथिनि यक्षिकायां त्वयि वर्तमाने वसामि प्रवास
दुःखायेति स बलेनाहमाविष्टा प्राबुध्ये । गतश्च तदर्थं वर्षसहस्र
दीर्घम् अतीतायाम् यामिन्यां देवदेवस्य त्र्यम्बकस्य आवस्थानुत्र च
समागमनुभूय बन्धुजनश्च स्वानस्थानेभ्यः समापतितमभिसमीक्ष्य
मुह्यमाना पत्युः पार्श्वमभिसरिष्यामीति प्रस्थितायामेव मयि त्वम-
भ्युपेत्य प्रतिपन्नोऽस्मि शरणमिच्छन्ती देवतामितिप्रसुप्तोऽसि अथ
शापदुःखाविष्टया तु मया तदा न तत्त्वतः परिच्छिन्नोऽभवान् अपि तु
शरणागतमविरतप्रमादायामस्यां महाटव्यामसुप्तं परित्यज्य गन्तु-
मिति मया त्वमपि आपतेवासि नीतः प्रत्यावर्ते च तस्मिन् देवगृहे
पुनरचिन्तयं कथमिव तवानेनानेन सह समाजं गमिष्यामीति ।
अथ राज्ञः श्रावस्तीश्वरस्य यथार्थनाम्नो धर्म्मवर्द्धनस्य कन्यां नव-
मालिकां घर्म्मकालसुभगे कन्यापुरविमानहर्म्यतले विशालकोमल
तल्पे शय्यातलमधिशयानां यदृच्छयोपलभ्य दिष्ट्येयं सुप्ता परिजनश्च
गाढनिद्रः शीतामयमश्च मुहूर्त्तमात्रं ब्राह्मणकुमारो यावत् कलत्रान्वा
निवर्त्स्येति त्वां तत्र शाययित्वा तमुद्देशमगमम् । दृष्टा चोत्सव-
श्रियं निर्विष्टा च स्वजनदर्शनसुखम् अभिवाद्य च त्रिभुवनेश्वर
मानाभीकपत्याकमनोपारूढसाध्वसञ्च नमस्कृत्य भक्तिप्रणतहृदया
भगवतीमम्बिकां तया गिरिदुहित्रा देव्या रक्षितमपि भद्रे मा भै-
षीरिदानीं भर्तृपार्श्वगामिनी गतक्लेशा प्राप्स्यस्यनुगृहीता सद्य एव
प्रत्यापन्नमहिम्ना प्रतिनिवृत्त्य दृष्टैव त्वां यथावदभ्यागतं कथं मत्-
सुतमत्रार्थे वसुधार्थपालस्य प्रागभूतः सखा प्रमतिरिति पापया
मया अविज्ञानादौदासीन्यमापादितम् । अपि प्रायमस्यामासक्त-
भावः कन्या चैनं कामयते युवानम् उभौ चेमौ अन्योन्यगुणौ अथवा साध्व-
सेन यान्योन्यमाकारं न विदन्याते गम्यताश्च मया आत्माघातद्यपि
वदनया कन्यया रहस्यरक्षणाय न समाभाषितः सखीजनो परिजनो।

वा नयामि तावत् कुमारं पुनरपीममर्थं सम्यगस्योपपन्नै रुपायैः साधयिष्यतीति मत्प्रभावप्रापितं भवन्तमेतदेव प्रापयितुं प्रत्यनैषम्। एवमिदं वृत्तम् यथा चाहं पितुस्ते पादमूलं प्रत्युपसर्पेयमिति प्राञ्जलिं मां भूयः परिष्वज्य शिरस्युपाघ्राय कपोलयोश्चुम्बित्वा स्नेहविक्लवा गतासीत्।

अहञ्च यथावागवहितः श्रावस्तीमभ्यवर्तिषि मार्गे च महति निगमे नैगमानां ताम्रचूडयुद्धकोलाहलो महानासीत्। अहञ्च तत्र सन्निहितः किञ्चिदस्मेषि सन्निधिनिवासी तु मे वृद्धविटः कोऽपि ब्राह्मणः शनकैः स्मितहेतुमपृच्छत्। अहञ्च कथमिव नारिकेलजातेः प्राच्यवाटकुक्कुटस्य प्रतीच्यवाटः पुरुषैरसमीक्ष्य बलाबलजातिताम्रचूडो व्यप्रमाणाधिकस्तेनैव प्रतिबद्ध इति। सोऽपि तज्ज्ञः किमनभिज्ञैरेभिराख्यातेन तूष्णीमास्वेति उपहृत्य ताम्बूलं कर्पूरसहित मुद्धृत्य मह्यं दत्त्वा चित्राः कथाः कथयन् स्थानमतिष्ठत्। प्रावर्तत चातिसंरब्धमनुप्रहारप्रहतपक्षपुटमुच्चकठोररवरवं युद्धमनयोः। जितश्चासौ प्रतीच्यवाटकुक्कुटः। सोऽपि विटः स्वकुक्कुटविजयहृष्टो मयि वयोविरुद्धं सख्यमुपेत्य तदहरेव स्वगृहे स्नानभोजनादि कारयित्वा उत्तरेद्युः श्रावस्तीं प्रति यान्तं मामनुगम्य स्मर्तव्योऽस्मि सत्यर्थ इति मित्रवद्विसृज्य प्रत्ययासीत्। अहञ्च गत्वा श्रावस्ती मध्वश्रान्तो बाह्योद्यानस्य लतामण्डपे शयितोऽस्मि हंसरवप्रबोधित श्चोत्थाय कामपि क्वणितनूपुरमुखराभ्यां चरणाभ्यां मदन्तिकमुपसर्पन्तीं युवतीमद्राक्षम्। सा त्वागत्य मत्समीपवर्तिनि चित्रपटे लिखितं मत्सदृशं कमपि पुरुषं माञ्च पर्यायेण निर्वर्णयन्ती सविस्मयं सवितर्कं ससंभ्रमञ्च क्षणमवातिष्ठत। मयापि तत्र चित्रपटे मत्सादृश्यं पश्यता तस्याश्च दृष्टिविचेष्टितमनाकस्मिकं मन्यमानेन ननु सर्वसाधारणोऽयं रमणीयः पुण्यारामभूमिभागः किमिति चिर स्थितिक्षोभोऽनुभूयते ननूपवेष्टव्यमित्यभिहिता सा सस्मितमनुगृहीतास्मीति न्यषीदत्। सङ्कथा च देशवार्तानुविद्धा चावयोरभूत्।

कथासंश्रिता च सा देशातिथिरसि दृष्टान्ते च ते अध्वश्रान्त्यामीव गात्राणि यदि न दोषो मम गृहेऽद्य विश्रमितुमनुग्रहः क्रियतामिति अशंसत्। अहञ्च अयि मुग्धे नैव दोषो गुण एवेति तदनुमार्गगामी तद्गृहगतो राजार्हैः स्नानभोजनादिभिरुपचरितः सुखं निषण्णो रहसि पर्यपृच्छं। महाभाग दिगन्तराणि भ्रमता कश्चिदस्ति किञ्चिदद्भुतं भवतोपलब्धमिति। ममाभवन्मनसि महदिदमाश्चर्यास्पदम् यथा खलु निखिलपरिजनसम्बाधसंलक्षितायाः सखी राजदारिकाया चित्रपटे चास्मिन्नपि तदुपरिविरचितसितवितानं हर्म्यतलं तद्गतश्च प्रकामविस्तीर्णं शरदभ्रपटलपाण्डुरं शयनं तदधिशायिनी च निद्राणीदृशोऽहम्। अमैवेयं प्रशिथिलितरतो नूनमनङ्गेन सापि राजकन्या तावतीं भूमिमारोपिता यस्यामसह्यमदनज्वरव्यथितोन्मादिता सती सखीनिर्बन्धपृष्टविक्रियानिमित्ता चातुर्य्येणैतदुपनिर्म्मायैव समर्थमुत्तरं दत्तवती रूपसंवादाच्च संशयादनया पृष्टोऽभिज्ञानमस्याः संशयं यथानुभवकथनेनेति जातनिश्चयोऽब्रवं भद्रे देहि चित्रपटमिति। सा त्वर्पितवती मद्धस्ते पुनस्तमादाय तामपि व्याजसुप्तामुक्तसम्भ्रमदनरागविजृम्भां वल्लभां तत्रैवाभिलिख्य काचिदेवम्भूता कुवलितरोहम्रस्य पुनः पार्श्वशायिन्यारव्यानीप्रसुप्तेन मयोपलब्धा किमेव अप्रहत्यालपच्च। त्वया तु तया विस्तरतः पृष्टः सर्व्वमेव वृत्तान्तमकथयम्। असौ च सख्याः मन्निमित्तान्यवस्थान्तराण्यवर्णयत्। तदाकर्ण्य च यदि तव सख्यामनुग्रहोन्मुखं मानसकुसुमचापिनिचिदहानि मामपि चन्द्रापुरे निराबाधनिवासकरमुपायमारचय्यागमिष्यामीति कथञ्चिदेनामभ्युपगमय्य गत्वा तदेव खर्वटं वृद्धविटेन समगंसि। ससम्भ्रमं सोऽपि विश्रमय्य तथैव स्नानभोजनादि कारयित्वा रहस्यपृच्छत्। आर्य्य कस्य हेतोश्चिरात्प्रत्यागतोऽसि।

प्रत्यवादिषमेनं श्रान्तस्त्वाहमार्य्यावाक्षि पृष्टः श्रूयतामस्ति श्रावस्ती नाम नगरी तस्याः पतिरपर इव धर्म्मपुत्रो धर्म्मवर्द्धनो नाम राजा। तस्य दुहिता प्रत्यादेश इव श्रियः प्राणा इव कुसुमधन्वनः

सौकुमार्यविडम्बितनवमालिका नवमालिका नाम कन्यका। सा मया समापतितदृष्टा कामनाराचपङ्क्तिमिव कटाक्षमालां मम मर्मणि व्यकिरत्। तत्कटाक्षोदरचारनतश्च धनान्तरितस्तत्र चलहते नेतरोऽस्ति वैद्यइति प्रवृत्तोऽस्मि तत्सनीद कश्चिदुपायमर्जयितुम्। अयमर्थ प्रतिवसति तस्याः वेश्मनि धात्री नाम भवेऽम्। अनुगतश्च मया समुपगम्य धर्मासनगतं धर्मवर्धनं पश्यसि। ममेयमेकैव दुहिता जात-मात्रायामस्यां जनन्यां संस्थिता माता च पिता च भूत्वाहमेव व्यवर्धयम्। तदर्थमेव विद्यामयं शुल्कमर्जितुं गतोऽभूवमन्ति-कमरोमुण्डमिनीमपदेवाश्चितकुमारः कोऽपि विप्रदारकः। तस्मै चेय-मनुमता दातुम् इतरस्मै न देया। तदधीना चेयं। तच्च विप्रश्चित-स्तेन समानीय पाणिगतमा साक्षयित्वा तस्मिन्नागतमात्रे संन्यस्तेति। दुरभिसन्धितया तु दुहितुर्वा मुग्धयैवाशा विप्रोपवयानामञ्चकानाम् इयं देवं मातृपितृश्यामीयं प्रणामागमयत्पररमागतोऽस्मि। यदि दत्वं प्रात्ययमयोऽनिमग्नसिमतिथिश्च मामनुयाचा यत्ने गतयत्नो दे-दायमपतितधुर्यो देवः सेवा भवद्गुणानामश्चालितचारित्रा ताव-दस्याः पाणिग्रहणमानयेयमिति। अथवमुक्तो नियत-मभिमतायमानः यदुहितृसन्निधौ मां वासयिष्यति। गतस्तु भवा-नामामिनि मासि फाल्गुने फाल्गुनीपूत्सवेषु राजान्तःपुरजनस्य तीर्थयात्रोत्सवो भविष्यति तीर्थस्थानात्प्राच्यां दिशि गोरुतान्तरमति-क्रम्य वानीरवलयवनाश्रयवर्तिनि कार्त्तिकेयगृहे करतलगतेन शुक्लाम्बर युगलेन स्त्रात्मानं त्व स्वच्छमनभिशङ्क्य यद्येतावन्तं कालं सह वि-हृत्य राजकन्यया भूयश्चास्मिन्नुत्सवे मज्जनानि विचरन् विहार व्याकुले कन्यकासमाजे मया सोऽपमृत्य त्वदभ्यासमुपेत्य गृह्यामि। पुन-स्त्वदुपस्थाने वासयो प्रविश्य यामिनीमदारिकावेषो प्रमाता नाम भूत्वा त्वामेवानुगच्छेयम्। अपावृता तु मामितस्ततोऽभिसंधाय नाम-सा दयन्ती तया विना न भोक्ष्यति वदन्त्येव भोक्ष्यति। तच्च मे च गच्छति कोपाद्गृहे बन्दकेषु परिजनेषु सदतु सखीजनेषु प्रेत्यतु

पौरजनेषु किं कर्त्तव्यतामूढे सामात्ये पार्थिवे त्वमात्मानमीमेत्य मां ख्यापयित्वा वदसि। देव सत्यं मे जामाता तवायमिति श्रीभुजाराधनम् अधीती चतुर्ष्वाम्नायेषु गृहीती षट्स्वङ्गेष्वान्वीक्षिकीविचक्षणश्चतुःषष्टिकलागमप्रयोगचतुरो विशेषेण गजरथतुरगतन्त्रवित् इष्वस्त्रशस्त्रकर्म्मणि गदायुद्धे च निरुपमः पुराणेतिहासकुशलः कर्त्ता काव्यनाटकाख्यायिकानां वेत्ता सोपनिषदोऽर्थशास्त्रस्य निर्मत्सरो गुणेषु विश्रम्भी सुहृत्सु शक्तः संविभागशीलः श्रुतधरो गतस्मयश्च नास्य दोषमणीयांसमप्युपलभे न च गुणेष्वविद्यमानम्। तस्माद्दशस्य ब्राह्मणमात्रस्य न लभ्य एव सम्बन्धी दुहितरमस्मिन् समर्प्य नाहं शोचितमन्यनात्मनं संकलयेयं यदि देवः साधु मन्यत इति। स इदमाकर्ण्य वैवर्ण्याक्रान्तवक्त्रः परमुपेतो विलक्षमात्रस्वस्थतोऽनुनेतुमभिलषिताभिसङ्गीर्णमेनाचभवन्त मन्त्रिभिः सह। त्वन्तु तेषामद्य श्वो वा मुक्तकण्ठं रुदित्वा चिरस्य बाष्पकुण्ठकण्ठः काष्ठान्याहृत्याग्निं सन्धुक्ष्य राजमन्दिरद्वारे चिताधिरोहणायोपक्रमिष्यसे स तावदेव त्वत्पादयोर्निपत्य सामात्यो नरपतिरभिमतेऽर्थे त्वामुपच्छन्द्य दुहितरं मह्यं दत्त्वा मद्योग्यतासमाराधितः सकलमेव राज्यभारं मयि समर्पयिष्यति। सोऽयमभ्युपायोऽनुष्ठेयो यदि तुभ्यं रोचत इति।

सोपि पटुर्विटानामग्रणीरत्युदग्रकपटप्रपञ्चः यथावत्कर्म्म यथोक्तमभ्यधिकञ्च निपुणमुपक्रान्तवान्। आसीच्च मम समीहितानामचिरकालसिद्धिः। अन्वभवञ्च मधुकर इव नवमालिकामार्द्रं सुमनसम् अस्य राज्ञः सिंहवर्म्मणः साहाय्यदानं सुहृत्कृतिभूमिगमनमित्युभयमपेक्ष्य सर्व्वबलसन्दोहेन चम्पामिमामुपगतो देवस्यैव दर्शनसुखमनुभवामीति।

श्रुत्वैतत्प्रमतिचरितं स्मितमुकुलितनयनो विश्रामप्रायम् ऊर्जितं चाटुप्रायं चेष्टितमित्युक्त्वा मार्गः प्रक्षालताम् अथेदानीमत्र भवान् प्रविशत्विति मित्रगुप्तमैक्षत क्षितीशपुत्रः।

इति दण्डिनः कृतौ दशकुमारचरिते प्रमतिचरितं नाम पञ्चम उच्छ्वासः।

षष्ठ उच्छ्वासः ।

मित्रगुप्तचरितम् ।

स चाचचक्षे ।

देव सोऽहमपि सुहृत्साधारणभ्रमणकारणः सुह्मेषु दामलिप्ताह्वयस्य नगरस्य बाह्योद्याने महान्तमुत्सवसमाजमालोकयम् । तत्र क्वचिदतिमुक्तलतामण्डपे कमपि वीणावादेनात्मानं विनोदयन्तं युवानमद्राक्षम् अप्राक्षं च भद्र को नामायमुत्सवः किमर्थं वा समारब्धः केन वा निमित्तेनोत्सवसमाजमनादृत्यैकान्ते भवानुत्कण्ठित इव परिवादिनीद्वितीयस्तिष्ठतीति । सोऽभ्यधत्त सौम्य सुह्मपतिस्तुङ्गधन्वा नामानपत्यः प्रार्थितवानमुष्मिन्नायतने विस्मृतविन्ध्यवासरागं वसन्त्या विन्ध्यवासिन्याः पादमूलादपत्यद्वयम् । अनया च किलास्मै प्रतिशयिताय स्वप्ने समादिष्टम् उत्पत्स्यते तवैकः पुत्रो जनिष्यते चैका दुहिता स तु तस्याः पाणिग्राहकमनुजीविष्यति सा तु सप्तमाद्वर्षादारभ्याविवाहात्प्रतिमासं कृत्तिकासु कन्दुकनृत्येन गुणवद्भर्तृलाभाय मां समाराधयतु यथाभिमतं चेष्टामुष्मै देयं। स चोत्सवः कन्दुकोत्सवनामास्त्विति । ततोऽल्पीयसा कालेन राज्ञः प्रियमहिषी मेदिनी नामैकं पुत्रमसूत समुत्पन्ना चैका दुहिता । साद्य नाम कन्या कन्दुकवती सोमापीडां देवीं कन्दुकविहारेणाराधयिष्यति । तस्यास्तु सखी चन्द्रसेना नाम धात्रेयिका मम प्रियासीत् सा चैषु दिवस

राजपुत्रेण भीमधन्वना बलवदनुबध्यते। तदहमुत्कण्ठितो मन्मथ
प्रशमनदुःखोद्विग्नचेताः अनेन वीणारवेणात्मानं किञ्चिदाश्वासयन्
विविक्तमध्यासइति।

अस्मिन्नेव च क्षणे किमपि नूपुरक्वणितमुपातिष्ठत्। आगता च
काचिदङ्गना। दृष्ट्वैव स तामुत्फुल्लदृष्टिरभ्युत्थायोपगूह्य तया
तल्पैकदेशोपाविशत् अब्रवीच्च सैषा मे प्राणसमा यद्विरहो दहन इव
दहति माम् इदञ्च जीवितमपहरता राजपुत्रेण मृत्युनेव नियन्त्रिता
नीता। न च प्रभवामि राजसूनुरित्यमुष्मिन्नपायमाचरितुम्। अतोऽ
मयात्मानं मुहूर्तं धारयित्वा त्यक्ष्यामि निष्प्रतिक्रियान् प्राणानिति।
सा तु पर्यश्रुमुखी सम्भ्रमात् मा स्म नाथ मत्कृतेऽध्यवस्यः साहसं
यत्त्वमनुत्तमात्सार्थवाहादर्थदासादुत्पन्नः कोशदासइति गुरुभिरभि-
हितनामधेयः पुनर्मद्व्यासङ्गाद्वेशदासइति दिग्भिः प्रख्यापितोऽसि
तस्मिंस्त्वय्युपरते यद्यहं जीवेयं कथं सा वेश्येति समर्थयेयं लोकवादम्
अतोऽद्यैव नय मामीप्सितं देशमिति। स तु मामभ्यधत्त भद्र भव-
दृष्टेषु राष्ट्रेषु कतमत्समृद्धं सम्पन्नसस्यं सत्पुरुषभूयिष्ठञ्चेति। तमहं
ईषद्विहस्याब्रवं भद्र विस्तीर्णेयमर्णवाम्बरा न पर्यन्तोऽस्ति स्थाने
स्थाने रम्याणां जनपदानाम्। अपि तु न चेदिह युवयोः सुखनिवास
कारणं किमप्युपायमुत्पादयितुं शक्नुयां ततोऽहमेव भवेयमध्वदर्शी।
तावदुदैरयन् रणितानि मणिनूपुराणाम्। अथासौ जातसम्भ्रमा
प्रागेवेयं भर्तुर्दारिका कन्दुकावती कन्दुकक्रीडितेन देवीं विन्ध्य-
वासिनीमाराधयितुम्। अनिन्दितदर्शना चेयमस्मिन् कन्दुकोत्सवे
सफलमस्तु युष्मच्चक्षुरागच्छतं मया अहमस्याः सकाशवर्तिनी
भवेयमित्ययासीत्। तामन्वयाव चावाम्। महति रत्नरङ्गपीठे स्थिता
प्रथमं ताम्रौष्ठीमपश्यम्। अतिष्ठच्च सा सर्वथैव मम हृदये न
मयान्येन वान्तराले दृष्टा चित्रीयाविष्टचित्तश्चाचिन्तयं किमियं
श्रीः नहि नहि तस्याः करे विन्यस्तं कमलम् अस्यास्तु करतलमेव
कमलम्। भुक्तपूर्वा चासौ पुरातनेन पुंसा पूर्वराजैश्च अस्याः

पुनरनवद्यमद्यतनमेव यौवनमिति चिन्तयत्येव मयि सा कन्यका सर्व्वाङ्गाणी बालातपाक्षमवाप्यस्पृष्टभूमिरालोलनीलकुटिलालका सविभ्रमं भगवतीमभिवन्द्य कन्दुकममन्दरागरूषिताक्षमनङ्गमिवालम्बत। लीलाशिथिलं च भूमौ मुक्तवती मन्दोत्थितं च किञ्चित् कुञ्चिताग्रेण प्रसृतकोमलाङ्गुलिना रागिपल्लवेन समाहत्य हस्तपृष्ठेन चोन्नीय चटुलदृष्टिलाञ्छितं स्तबकमिव भ्रमरमालानुबद्धमवपतन्तमाकाश एवाग्रहीत् अमुञ्चच्च मध्यविलम्बितलये मृदुतलयेव वृद्धवृद्धप्रहरन्ती तत्क्षणं चूर्णपदमदर्शयत्। प्रशान्तं च तं निर्दयप्रहारैरुदपातयत् विपर्ययेण च प्राशमयत्। पक्षद्वयागतं च वामदक्षिणाभ्यां कराभ्यां पर्यायेणाभिघ्नती शकुन्तमिवोदस्थापयत् दूरोत्थितं च प्रपतन्तमभिहत्य गीतमार्गमारचयत्। प्रतिदिशं च गमयित्वा प्रत्यागमयत्।

एवमनेककरणमधुरं विहरन्ती रङ्गगतस्य रक्तचेतसो जनस्य प्रतिक्षणमुच्चावचाः प्रशंसावाचः प्रतिगृह्णती तत्क्षणमारूढविस्रम्भं कोशदासमंसेऽवलम्ब्य प्रकण्टकितगात्रमुत्पुलकैव मय्यभिमुखीभूय तिष्ठति तन्मयभावनीयं कन्दर्पकारितकटाक्षदृष्टिः स्मरदनुमार्गं विचलित लीलाञ्चितभ्रूलता श्वासानिलवेगान्दोलितैर्दन्तच्छदरश्मिजालैर्लीलापल्लवैरिव मुखकमलपरिमलग्रहणलोलानलिकुलानाकुलयन्ती मण्डलभ्रमणेषु कन्दुकस्यातिशीघ्रप्रचारतया विभ्रान्तीव मद्दर्शनभयया पुष्पमयं पञ्जरं पञ्चबिन्दुप्रसृतेषु पञ्चापि पञ्चबाणबाणान् युगपदिवाभिपततस्त्रासेनावघट्टयन्ती गोमूत्रिकाप्रचारेषु घनदर्शितरागविभ्रमा विद्युल्लतामिव विडम्बयन्ती भूषणमणिरणितदत्तलयसाम्यादिपादचारम् अपदेशस्मितप्रभानिषिक्तबिम्बाधरम् अंसस्रंसितप्रतिसमाहितशिखण्डभारं समाघट्टितक्वणितरत्नमेखलागुणम् अञ्चितोच्छ्रितपृथुनितम्बविलम्बितविचित्रांशुकोज्ज्वलम् आकुञ्चितप्रसृतवेल्लितभुजलताभिहतपतितकन्दुकम् आवर्जितबाहुपाशम् उपरि परिवर्तितत्रिकविलग्नलोलकुन्तलम् अवगलितकर्णपूरकनकपत्रप्रतिसमाधान

ग्रीवृताञ्चितक्रमितप्रस्तुतक्रीडनम् असकृदुत्क्षिप्यमाणकरपादपल्लवा भ्रान्तरम्यान्तरकन्दुकम् अवनमनोन्नमनैरन्यासष्टदृष्टमध्यमयष्टिकम् अवपतनोत्पतननिर्दयमुक्ताहारम् अङ्कुरितघर्मसलिलदूषितकपोलपत्रभङ्गश्रमाधिकृतश्रवणपल्लवानिलम् आगलितस्तनतटांशुकनियमनव्यापृतैकपाणिपल्लवम् निषद्योत्थाय निमील्योन्मील्य स्थित्वा गत्वा चैवातिचित्रं पर्यक्रीडत राजकन्या। अभिसृत्य भूतलाकाशगेऽपि क्रीडान्तराणि दर्शनीयान्येकैकेनैव चानेकेनैव कन्दुकेनादर्शयत्। चन्द्रसेनादिभिश्च प्रियसखीभिः सह विहृत्य विहृतान्ते चाभिवन्द्य देवीं मनसा मे सानुरागेणैव परिजनेनानुगम्यमाना कुवलयशरमिव कुसुमशरस्य मय्यपाङ्गं समर्पयन्ती सापदेशमसकृदावर्तमानवदनचन्द्रमण्डलतया स्वहृदयमिव मत्समीपे प्रेरितं प्रतिनिवृत्तं नयेनापेक्षयन्ती सह सखीभिः कुमारीपुरमगमत्।

अहमनङ्गविह्वलः स्वमेव गत्वा कोशदासेन यथावदनुदारं स्नानभोजनादिकमनुभावितोऽस्मि। सायं चोपसृत्य चन्द्रसेना रहसि मां प्रणिपत्य मधुरं सस्मितं प्रणयपेशलमाचक्षयन्त्युपाविशत्। अथाह स्म कोशदासः भूयासमेवं यावदायुरायताक्षि त्वत्प्रसादस्य पात्रमिति। मया तु सस्मितमभिहितं सखे किमेतदाशास्यम् अस्ति किंचिदङ्गनमनया तदङ्कनेष्ठया राजसूनुरुपक्षिप्तो वानरीमिवैनां करोति विरसचेष्टां पुनश्च पश्यतीति। तया तु कोऽपि याचितः कश्चित् सोऽयमार्य्यो यादृशाकारो जनोऽस्यैवमनुगृहीतः यदस्मिन्नेव जन्मनि मानुषं वपुरपनीय वानरीकरिष्यते। तदाख्यातमिदम् अन्यथापि सिद्धं न समीहितम्। अद्य खलु कन्दुकोत्सवे भवन्तमवेक्ष्योच्छ्वसितमनोभवाकारमभिलषन्ती रोषादिव स्मरहितातिमात्रमायास्यते राजपुत्री साऽयमर्थः। विदितभाववशा मया मात्रे तया च तन्मात्रे महिष्या च मनुजेन्द्राय निवेदयिष्यते। विदितार्थश्च पार्थिवस्त्वया दुहितुः पाणिं ग्राहयिष्यति। ततश्च त्वदनुजीविना राजपुत्रेण भवितव्यम्। अस्ति हि देवतासमादिष्टो विधिः त्वदायत्तश्च राज्ये नाथ-

मेव त्वामतिक्रम्य मामेवं रोद्धुं भीमधन्वा। तत्प्रवृत्तामर्षं निवर्त्तु-र्हसि दिनानीति मामामन्त्र्य प्रियचोपगूह्य प्रत्ययासीत्। मम च कोशदासस्य च तदुक्त्यनुसारेण बहु विकल्पयतो कथञ्चिदक्षीयत क्षपा।

क्षपान्ते च कृतयथोचितनियमस्तमेव प्रियादर्शनसुभगमुद्यानो-द्देशमुपागतोऽस्मि। तत्रैव चोपस्थाय राजपुत्रो निरभिमानमभि-मुखीभिः कथाभिर्मामनुवर्त्तमानो मुहूर्तमास्त। नीत्वा चोपकार्य्यां मामसमेन स्नानभोजनप्रायेणादिव्यतिकरेणोपाचरत्। तत्रगतश्च स्वप्ने मामनुभूयमानप्रियादर्शनाभिकूलसुखमायतेन निगडेनातिबल-वत् बहुपुरुषैः पीवरभुजदण्डोपरुद्धमबन्धयन्माम् प्रतिबुद्धश्च सहसा समभ्यधात्। अयि दुर्मते श्रुतमाचरितं त्वया चन्द्रसेनाया जाल-रन्ध्रनिःसृतं तस्येष्टावबोधप्रयुक्तयानया कुब्जया। त्वं किलाभिलषितो वराक्या कन्दुकावत्या तव किलानुजीविना मया स्थेयं त्वदर्थः किला-नतिक्रमता मया चन्द्रसेना कोशदासाय दास्यतइत्युक्ता। पार्श्वचर-पुरुषमेकमालोक्याकथयत् प्रक्षिपेमं सागरइति। सतु लब्धराज-प्रसादहृष्टो देव यदाज्ञापयसीति यथादिष्टमकरोत्। अहन्तु निरालम्बनो भुजाभ्यामितस्ततः स्पन्दमानः किमपि काष्ठं दैवदत्त-मुरसोपश्लिष्य तावदक्षोभि। यावदपासरद्वासरः शर्वरी च सर्वा। प्रत्युषस्यदृश्यत किमपि वहित्रम् अमुत्रासन् यवनाः ते मामुद्धृत्य रामेषुनाम्ने नाविकनायकाय कथितवन्तः कोऽप्ययमायसनिगडबद्ध एव जले लब्धः पुरुषः सोयमपि सिद्धेत्सहस्रं मात्राणां चयेनैके-नेति। अस्मिन्नेव क्षणे नैकनौकापरिवृतः कोऽपि मद्गुरभ्यधावत्। अबिभयुर्यवनास्तावदतिजवना नौकाः श्वान इव वराहमस्मत्पोतं पर्य्य-रुन्धन्। प्रावर्त्तत सम्प्रहारः। पराजयिषत यवनाः। तानहमगतीन् अवसीदतः समाश्वास्यावादिषम् अपनयत मे निगडबन्धनम्। अयमह-मवसादयामि वः सपत्नानिति। अमी तथा अकुर्वन्। सर्वांश्च तान् प्रतिभटान् भल्लवर्षिणा भीमटङ्कृतेन शार्ङ्गेण जवनमीक्षिताक्रम-

कार्यम्। अवबुध्य च तन्निश्चयोऽयमस्यां वेलायां प्रोक्तम् अमुना नाविकनायकमनभिसरमभिपत्य भीमयाम्यमयष्टिभम्। असौ चासीत् स एव भीमधन्वा। तदाहमवबुध्य जातव्रीडममुं तात किं दधासि कृतान्तविलसितानीति। ते तु सांयात्रिका मदीयेनैव प्रग्रहेण तमति-गाढं बद्धा स्वयंवशविकारवमकुर्वन्माद्यापूर्णवम्। दुर्वारा तु सा नौरनुकूलवातनुन्ना दूरमभिपत्य कमपि द्वीपं निविडमाश्लिष्टवती तत्र च स्वादु पानीयमेधांसि कन्दमूलफलानि चाजिहीर्षवो गाढ-पतितशिलावलब्धमवतराम। तत्र चासीन्महाग्रावा। सोऽहमतो रमणीयोऽयं पर्वतनितम्बभागः कान्ततरेयं गन्धपाषाणवत्युपत्यका शिशिरमिन्दीवरारविन्दमकरन्दबिन्दुचन्द्रकोत्तरं गोत्रवारि रम्योऽयम् अनेकवर्णकुसुममञ्जरीभरस्तरुवनाभोग इत्युच्चमना दृष्टा अङ्कज-पङ्कजपक्षिताध्यारूढशैलशिखरः शीकीभूतसुखभाभिः पद्म-रागसोपानशिलाभिः किमपि नाभीकपरागधूसरं सरः समभ्यगाम्। स्नातश्च कांश्चिदम्भस्तटाद्बिसभङ्गानास्वाद्य अंसलमकरन्दशिरीषत-तिना केनापि भीमरूपेण ब्रह्मराक्षसेनाभिपत्य कोऽसि कुतस्त्योऽसीति निर्भर्त्स्य सताभ्यधायि निर्भयेन च मया सोऽभ्यधीयत सौम्य सोऽहमस्मि द्विजन्मा। शत्रुहस्तादर्णवम् अर्णवाद्यवननावं यवन-नावश्चिरायावकाशेन पर्वतप्रदेशं गतो यदृच्छयास्मिन् सरसि वि-श्रान्तो भद्रं तवेति। सोऽब्रवीत् नचेद्ब्रवीषि प्रश्नानश्नामि त्वामिति। मयोक्तं पृच्छ तावत् भवत्विति। अथावयोरेकार्याख्यं आसीत् संलापः।

किं क्रूरं स्त्रीहृदयं किं गृहिणः प्रियहिताय दारगुणाः।
कः कामः संकल्पः किं दुष्करसाधनं प्रज्ञा॥

तत्र धूमिनीगोमिनीनिम्बवतीनितम्बवत्यः प्रमाणमित्युपदिष्टो मया सोऽब्रवीत् कथय कीदृश्यस्ता इति। अत्रोदाहरम् अस्ति त्रिगर्तो नाम जनपदः तत्रासन् गृहपतयस्त्रयः स्फीतसारधनाः सो-दर्याः धनकधान्यकधन्यकाख्याः। तेषु जीवत्सु न ववर्ष वर्षाणि द्वादश दशशताक्षः क्षीणसारं सस्यम् ओषध्यो वन्ध्याः न फलवन्तो

वनस्पतयः क्लीबा मेघाः क्षीणस्रोतसः स्रवन्त्यः पङ्कशेषाणि पल्व-
लानि निर्निस्यन्दान्युत्समण्डलानि विरलीभूतं कन्दमूलफलम् अव-
हीनाः कथाः गलिताः कल्याणोत्सवक्रियाः बहुलीभूतानि तस्कर
कुलानि अन्योन्यमभक्षयन् प्रजाः पर्यलुठन्नितस्ततो बलाकापाण्डु-
राणि नरशिरःकपालानि पर्यहिण्डन्त शुष्काः काकमण्डल्यः शून्यी-
भूतानि नगरग्रामखर्वटपुटभेदनादीनि। तत एते गृहपतयः सर्वं
धान्यनिचयमुपयुज्याजाविकं गवलगणं गवां यूथं दासीदासजनम-
पत्यानि ज्येष्ठमध्यमभार्ये च क्रमेण भक्षयित्वा कनिष्ठभार्यां धूमिनीं
श्वोभक्षणीयेति समकल्पयन्। अथ कनीयान् धन्यकः प्रियां
स्वामनुमन्तुमक्षमया सह तस्यामेव निश्यपासरत्। मार्गक्लान्तां चोद्वह-
न्वनं ययौ। स्वमांसासृगपनीतक्षुत्पिपासां तां नयन्नन्तरे कमपि
च निकृत्तकर्णपाणिपादनासिकमवनिपृष्ठे विचेष्टमानं पुरुषमद्रा-
क्षीत्। तमप्यार्द्राशयः स्कन्धेनोद्वहन् कन्दमूलमृगबहुले गहनोद्देशे
यत्नरचितपर्णशालश्चिरमवसत्। अमुं च रोपितव्रणमिङ्गुदीतैला-
दिभिरामिषेण शाकेनात्मनिर्विशेषं पुपोष। पुष्टं च तमुद्रिक्तधातु-
मेकदा मृगान्वेषणाय च प्रयाते धन्यके सा धूमिनी रिरंसयोपाति-
ष्ठत्, भर्त्सितापि तेन बलात्कारमरीरमत्। निवृत्तं च पतिमुदका-
र्थिनमुद्दिश्य कूपात्पिब रुजति मे शिरः शिरोरोग इत्युदञ्चनं स-
रज्जु पुरश्चिक्षेप। उदञ्चन्तं च तं कूपादधः स्वगात्पृष्ठतो गत्वा प्रणु-
नोद। तं च विकलं स्कन्धेनोदुह्य देशाद्देशान्तरं परिभ्रमन्ती पति-
व्रताप्रतीतिं लेभे बहुविधाश्च पूजाः। पुनरवन्तिराजानुग्रहादति-
महत्या भूत्या न्यवसत्। अथ पानीयार्थिसार्थजनसमापत्तिदृष्टो-
द्धृतमवन्तिषु भ्रमन्तमाहारार्थिनं भर्तारमुपलभ्य सा धूमिनी येन
मे पतिर्विकलीकृतः स दुरात्मायमिति तस्य साधोश्चित्रवधमज्ञेन
राज्ञा समादेशयाञ्चकार। धन्यकस्तु दत्तपश्चाद्बन्धो वध्यभूमिं
नीयमानः सशेषत्वादायुषो यो मया विकलीकृतोऽभिमतो भिक्षुः

स चेन्मे पापमाचक्षीत युक्तो मे दण्डस्त्वदीनमधिकृतं जगाद। को दोष इत्यनुयुज्य दर्शितेऽमुष्मिन् स विकलः पर्य्यङ्कः पादपतितस्तस्य साधोस्तन्मूलमसत्यञ्च तस्यास्तथाभूतं दुश्चरितमार्य्यबुद्धिराचचक्षे । कुपितेन राज्ञा विरूपितमुखी सा दुष्कृतकारिणी कृता श्वपाचिका कृतश्च धन्यकः प्रसादभूमिः । तद्ब्रवीमि स्त्रीहृदयं क्रूरमिति ।

पुनरनुयुक्तो गोमिनीवृत्तान्तमाख्यातवान् ।

अस्ति द्रविडेषु काञ्ची नाम नगरी तस्यामनेककोटिसारः श्रेष्ठिपुत्रः शक्तिकुमारो नामासीत् । सोऽष्टादशवर्षदेशीयश्चिन्तामापेदे नास्त्यदाराणामननुगुणदाराणां वा सुखं नाम तत्कथन्नु गुणवद्विन्देयं कलत्रमिति । अथ परप्रत्ययाहृतेषु दारेषु यादृच्छिकीं सम्पत्तिमनभिसमीक्ष्य कार्त्तान्तिको नाम भूत्वा वस्त्रान्तपिनद्धशालिप्रस्थो भुवं बभ्राम । लक्षणज्ञोऽयमित्यमुष्मै कन्याः कन्यावन्तः प्रदर्शयाम्बभूवुः । यां काञ्चिल्लक्षणवतीं सवर्णां कन्यां दृष्ट्वा स किल स्म ब्रवीति भद्रे शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नमस्मानभ्यवहारयितुमिति । स हसितावधूतो गृहाद्गृहं प्रविश्याभ्रमत् । एकदा तु शिविषु कावेरीदक्षिणतीरेषु पट्टने सह पितृभ्यामवसितमहर्द्धिं मन्दीर्णभवनसारां धात्र्या प्रदर्श्यमानां कांचन विरलभूषणां कुमारीं ददर्श । अस्यां संसक्तचक्षुश्चातर्कयत् । अस्याः खलु कन्यकायाः सर्व्व एवावयवा नातिस्थूला नातिकृशा न ह्रस्वा नातिदीर्घा न विकटा मृजावन्तश्च । रक्ततलाङ्गुली यवमत्स्यकमलकलशाद्यनेकपुण्यलेखालाञ्छितौ करौ । सममुल्फसन्धी मांसलावशिरालौ चाङ्घ्री जङ्घे चानुपूर्व्ववृत्ते । पीवरोरुग्रस्ते इव दुरुपलक्ष्ये जानुनी । सकृद्विभक्तश्चतुरस्रः ककुन्दरविभागशोभी रथाङ्गाकारसंस्थितश्च नितम्बभागः । तनुतरमीषन्निम्नं गम्भीरं नाभिमण्डलं वलित्रयेण चालङ्कृतमुदरम् उरोभागव्यापिनावुन्मग्नचूचुकौ विशालारम्भशोभिनौ पयोधरौ । धनधान्यपुत्रभूयस्त्वचिह्नलेखालाञ्छिततले स्निग्धोदरकोमलनखमणी

ह्यनुपूर्ववृत्तताम्राङ्गुली सन्नतांसदेशे सौकुमार्यवत्यौ निमग्नपर्वसन्धी च बाहुलते। तन्वी कम्बुवृत्तबन्धुरा च कन्धरा। वृत्तमध्यविभक्तरागाधरम् असंक्षिप्तचारुचिबुकम् आपूर्णकठिनगण्डमण्डलं सङ्गतानुवक्रनीलस्निग्धभ्रूलतम् अनतिप्रौढतिलकुसुमसदृशनासिकम् अत्यसितधवलरक्तत्रिभागभासुरमधुराधीरसञ्चारमन्थरायतेक्षणम् इन्दुशकलसुन्दरललाटम् इन्द्रनीलशिलाकाररम्यालकपंक्तिद्विगुणकुण्डलितम्लानालीकनाललितलम्बश्रवणपाशयुगलमाननकमलम्। अनतिभङ्गुरो बहुलः पर्यन्तेऽप्यकपिलरुचिरायामवानेकैकनिसर्गसमस्निग्धनीलो गन्धग्राही च मूर्द्धजकलापः। सेयमाकृतिर्न व्यभिचरति शीलमासज्जति च मे हृदयमस्यामेव तत्परीक्ष्यैनामुद्वहेयम् अविमृश्यकारिणां हि नियतमनेकाः पतन्त्यनुशयपरम्परा इति स्निग्धदृष्टिराचष्ट। भद्रे कच्चिदस्ति कौशलं शालिप्रस्थेनानेन सम्पन्नमाहारमस्मानभ्यवहारयितुमिति। ततस्तया वृद्धदासी साकूतमालोकिता। तस्य हस्तात्प्रस्थमात्रं धान्यमादाय क्वचिदलिन्दोद्देशे सुसिक्तसंमृष्टे दत्तपादशौचमुपावेशयत्। सा कन्या तान् गन्धशालीन् संक्षुद्य मात्रया विशोष्यातपे मुहुर्मुहुः परिवर्त्य स्थिरसमायां भूमौ नालीपृष्ठेन मृदु मृदु घट्टयन्ती तुषैरखण्डैस्तण्डुलान् पृथक् चकार जगाद च धात्रीं मातरेभिस्तुषैरर्थिनो भूषणमृजाक्रियाक्षमैः स्वर्णकारास्तेभ्य इमान् दत्त्वा लब्धाभिः काकिणीभिः स्थिरतराण्यनत्यार्द्राणि नातिशुष्काणि काष्ठानि मितम्पचां स्थालीमुभे शरावे चाहरेति। तथाकृते तया तांस्तण्डुलाननतिनिम्नोत्तानविस्तीर्णकुक्षौ ककुभोलूखले लोहपत्रवेष्टितमुखेन समशरीरेण विभाव्यमानमध्यतानवेन व्यायतेन गुरुणा खादिरेण मुसलेन चतुरललितोत्क्षेपणावक्षेपणायासितभुजमसकृदङ्गुलीभिरुद्धृत्योद्धृत्यावहत्य शूर्पशोधितकणकिंशारुकांस्तण्डुलानसकृदद्भिः प्रक्षाल्य क्वथितपञ्चगुणे जले दत्तचुल्लीपूजा प्राक्षिपत्। प्रश्लथावयवेषु प्रस्फुरत्सु तण्डुलेषु मुकुलावस्थामतिवर्त्तमानेषु संक्षिप्यानलमुपहितमुखपिधानया स्थाल्या अन्न

मवक्षमगालयत्। दर्व्या चावघट्टमानया परिवर्त्य समपक्वेषु सिक्थेषु तां स्थालीमधोमुखीमवातिष्ठिपत्। इन्धनान्यन्तःसाराण्यम्भसा समभ्युक्ष्य प्रशमिताग्नीनि कृष्णाङ्गारीकृत्य तदर्थिभ्यः प्राहिणोत्। एभिर्लब्धाः काकिणीर्दत्त्वा शाकं घृतं दधि तैलमामलकं चिञ्चाफलञ्च यथालाभमानयेति। तथानुष्ठिते च तया द्वित्रानुपदंशानुपपाद्य तदन्नमण्डमार्द्रवालुकोपहितनवशरावगतमिति मृदुना तालवृन्तानिलेन शीतलीकृत्य सलवणसम्भारं दत्त्वाङ्गारधूपवासितञ्च सम्पाद्य तदप्यामलकं श्लक्ष्णपिष्टमुत्पलगन्धि कृत्वा धात्रीमुखेन स्नानाय तमचोदयत्। तया च स्नानशुद्धया दत्ततैलामलकः क्रमेण सस्नौ। स्नातः सिक्तमृष्टे कुट्टिमे फलकमारुह्य पाण्डुहरितस्य त्रिभागशेषलूनस्याङ्गणकदलीपलाशस्योपरि शरावद्वयदत्तमार्द्रमभिमृशन्नतिष्ठत्। सा तु तां पेयामेवाग्रे समुपाहरत्। पीत्वा चापनीताध्वक्लमः प्रहृष्टः प्रक्लिन्नसकलगात्रः स्थितोऽभूत्। ततस्तस्य शाल्योदनस्य दर्वीद्वयं दत्त्वा सर्पिर्मात्रां सूपमुपदंशञ्चोपजहार। इमञ्च दध्ना च त्रिजातकावचूर्णितेन सुरभिशीतलाभ्याञ्च कालशेयकाञ्जिकाभ्यां शेषमन्नमभोजयत्। सशेष एवान्धस्यसावतृप्यत् अयाचत च पानीयम्। अथ नवभृङ्गारसम्भृतमगुरुधूपधूपितमभिनवपाटलाकुसुमवासितमुत्फुल्लोत्पलग्रथितसौरभं वारि नालीधारया पातयाम्बभूव। सोऽपि मुखोपहितशरावेण हिमशिशिरकणकरालितारुणायमानाक्षिपक्ष्मा धारारवाभिनन्दितश्रवणः स्पर्शसुखोद्भिन्नरोमाञ्चकर्कशकपोलपरिमलप्रवालोत्पीडकपुञ्जघ्राणरन्ध्रो माधुर्यप्रकर्षावर्जितरसनेन्द्रियस्तदच्छं पानीयमाकण्ठं पपौ। शिरःकम्पसंज्ञावारिता च पुनरपरकरकेणाचमनमदत्त कन्या। वृद्धया तु तदुच्छिष्टमपोह्य हरितगोमयोपलिप्ते कुट्टिमे स्वमेवोत्तरीयकर्पटं व्यवधाय क्षणमशेत। परितुष्टश्च विधिवदुपयम्य कन्यां निन्ये। नीत्वैतदनपेक्षः कामपि गणिकामवरोधमकरोत्। तामप्यसौ प्रियसखीमिवोपाचरत् पतिञ्च दैवतमिव मुक्ततन्द्रा पर्यचरत् गृहकार्याणि चाहीनमन्वतिष्ठत् परिजनञ्च

दाक्षिण्यनिधिरात्माधीनमकरोत्। तद्गुणवशीकृतश्च भर्त्ता सर्व्वमेव कुटुम्बं तदायत्तमेव कृत्वा तदेकाधीनजीवितशरीरस्त्रिवर्गं निर्व्विवेश। तद्ब्रवीमि गृहिणः प्रियहिताय दारगुणा इति।

ततस्तेनानुयुक्तो निम्बवतीवृत्तमाख्यातवान्।

अस्ति सौराष्ट्रेषु वलभी नाम नगरी तस्यां गृहगुप्तनाम्नो गुह्यकेन्द्रतुल्यविभवस्य नाविकपतेर्दुहिता रत्नवती नाम। तां किल मधुमत्याः समुपागम्य बलभद्रो नाम सार्थवाहपुत्रः पर्य्यणैषीत्। तस्यामपि नववध्वा रहसि रभसविघ्नितसुरतसुखो झटिति द्वेषमत्येतरं बबन्ध न तां पुनर्द्रष्टुमिष्टवान्। तद्गृहागमनमपि सुहृद्वाक्यशतातिवर्त्ती लज्जया परिजहार तां च दुर्भगां तदाप्रभृत्येव नेयं रत्नवती निम्बवती चेयमिति स्वजनः परिजनश्च परिबभूव। गते च कस्मिंश्चित्कालान्तरे सा तु तप्यमाना का मे गतिरिति चिन्तयन्ती कामपि वृद्धप्रव्राजिकां मातृस्थानीयां देवशेषकुसुमैरुपस्थितामपश्यत्। तस्याः पुरो रहसि सकरुणं रुरोद। तयाप्यश्रुमुख्या बहुप्रकारमनुनीय रुदितकारणं पृष्टा त्रपमाणापि कार्य्यगौरवात्कथञ्चिदब्रवीत्। अम्ब किं ब्रवीमि दौर्भाग्यं नाम जीवन्मरणमङ्गनानां विशेषतश्च कुलवधूनां तस्याहमस्म्युदाहरणभूता। मातृप्रमुखोऽपि ज्ञातिवर्गो मामवज्ञयैव पश्यति तेन सुदृष्टां मां कुरु नचेत् त्यजेयमद्यैव निष्प्रयोजनान् प्राणानाविरामाच्च मे रहस्यं न ख्याप्यमिति पादयोः पपात। सैनामुत्थाप्योद्वाष्पोवाच वत्से माध्यवस्यः साहसम्। इयमस्मि त्वन्निदेशवर्त्तिनी यावति मदुपयोगः तावति भवाम्यनन्याधीना यद्येवासि निर्व्विण्णा तपश्चर त्वं मदधिष्ठिता पारलौकिकाय कल्याणाय। नन्वयमुदर्कः प्राक्तनस्य दुष्कृतस्य यदनेनाकारेणेदृशेन शीलेन जात्या चैवम्भूतया समनुगता सुव्यक्तमस्मादेव भर्त्तुर्द्वेष्यतां गतासि। यदि कश्चिदस्त्युपायः प्रतिद्वन्द्वप्रतिक्रियायै दर्शयामुं मतिरिह ते पटीयसीति। अथासौ कञ्चित् कालमधोमुखी ध्यात्वा दीर्घोष्णश्वासपूर्व्वमवोचत् भगवति पतिरेकदैवतं वनितानां विशेषतः

कुलजानाम् । अनककुटुम्बकाभ्युपायहेतुभूतं किञ्चिदाचरणीयम् । अस्त्यस्य प्रातिवेश्यो वणिक् अभिजनेन विभवेन राजान्तरङ्गभावेन च सर्व्वान्पौरानतीत्य वर्त्तते तस्य कन्या कनकवती नाम मत्समानरूपावयवा ममातिस्निग्धा सखी तया सह तद्विमानहर्म्यतले ततोऽपि द्विगुणमहिता विहरिष्यामि । त्वया तु तन्मातृप्रार्थनं सकलमा-मभिधाय पतिरेतदर्थं कथयितव्यः । समीपगतेषु च कुञ्जासु क्रीडामत्ता नाम कन्दुकं स्वं प्रापयेयम् । अथ तमादाय तस्य हस्ते दत्त्वा वक्ष्यसि पुत्र तवेयं भार्य्या सखी निधिपतिदत्तस्य सर्वश्रेष्ठिमुख्यस्य कन्या कनकवती नाम त्वामियमनवद्या निष्क्रयतयार्थेति रत्नवतीनिमित्तमर्थं निन्दति तदेव कन्दुकं विपणधनं प्रत्यर्पणीयमिति । स तथोक्तो नियतमुन्मुखीभूय तामेव प्रियसखीं मन्यमानो मां बद्धाञ्जलि याचमानायै मह्यं भूयश्च प्रार्थितः सान्निध्यायमर्पयिष्यति । तेन रत्नेऽसौ प्रक्षिप्य रागमुन्मुखीकृत्य यथासौ हृतसङ्केतो देशान्तरमादाय मां गमिष्यति तथोपपादनीयमिति । ध्रुवमभ्युपेतया मात्रा तथैव सम्पादितम् । अथैतां कनकवतीति वृद्धतापसी विप्रलब्धो बलभद्रः सारभूतमाभरणमादाय निशि नीरन्ध्रतमसि प्रावसत् । सा तु तापसी वार्त्तामापादयत् मन्देन मया निर्निमित्तमुपेक्षिता रत्नवती श्वशुरौ च परिभूतौ सुहृदश्चातिवर्त्तितास्तदेव संकटेऽस्मिन् जीवितुं निर्विण्णोऽस्मीति बलभद्रः पूर्व्वेद्युर्मामकथयत् नूनमसौ तेन नीता अक्लिश्याचिराद्भविष्यतीति । तत् श्रुत्वा तद्बान्धवास्तदन्वेषणं प्रति शिथिलयत्नास्तस्थुः । रत्नवती तु मार्गे काञ्चित्पण्यदासीं संगृह्य तयोह्यमानपाथेयाद्युपस्करा खेटकपुरमगमत् । अमुत्र च व्यवहारकुशलो बलभद्रः स्वल्पेनैव मूल्येन महद्धनमुपार्ज्जयत् पौराग्रगण्यश्चासीत् । परिजनश्च भूयानर्थवशात्समाजगाम । ततस्तां प्रथमदासीं न कर्म्म करोषि दुष्टे मुधासि अप्रियं ब्रवीषीति प्रसभं मुष्ट्या भृशमताडयत् । चेटी तु प्रसादकालोपाख्यातरहस्यात्मा वृत्तान्तैकदेशमाचरोषा निर्बिभेद । तत् श्रुत्वा एकेन तु दश-

वञ्चिता घोरकूटहसन्निधौ निधिपतिदत्तस्य कन्यां कनकवतीं मोहि-
तापहृत्यान्तःपुरे निवसन्त्यैव दुर्म्मतिर्बलभद्रः तस्य सर्व्वसहस्त्वं न
भवद्भिः प्रतिबन्धनीयमिति नितरामभर्त्सत। भीतश्च बलभद्रमभि-
जगाद रत्नवती। न भेतव्यमेवं ब्रूहि नेयं निधिपतिदत्तकन्या कनक-
वती वलभ्यामेव गृहगुप्तदुहिता रत्नवती नामेयं दत्ता पितृभ्यां
मया च न्यायोढा। न चेत्प्रतीथ प्रणिधिं प्रहिणुतास्या बन्धुपार्श्व-
मिति। बलभद्रस्तु तथोक्त्वा श्वेवीपालितभावेन तावदवातिष्ठत्।
यावत्पुरस्तादस्य लब्धवृत्तान्तो गृहगुप्तः खेटकपुरमागत्य सह
जामात्रा दुहितरमतिप्रीतः प्रत्यनैषीत् तथा हृत्वा। रत्नवती कनक-
वतीति भावयतस्तस्यैव बलभद्रस्यातिवल्लभा जाता तद्ब्रवीमि कामो
नाम सङ्कल्पइति।

तदनन्तरमसौ नितम्बवतीवृत्तान्तमप्राक्षीत् सोऽहमब्रवम्।

अस्ति शूरसेनेषु मथुरा नाम नगरी तत्र कश्चित् कुलपुत्रः
कलासु गणिकासु चातिसक्तो मित्रार्थे सभुजमात्रनिर्व्यूढानेक
कलहः कलहकण्टकइति कर्कशैरभिख्यापिताख्यः प्रत्यवात्सीत्।
स चैकदा कस्यचिदागन्तोश्चित्रकरस्य हस्ते चित्रपटं ददर्श। तत्र
काचिदालिख्यमाना युवतिरालोकनमात्रेणैव कलहकण्टकस्य कामातुरं
चेतश्चकार। स च तमब्रवीत् भद्र विरुद्धमिवेतत्प्रतिभाति यत
कुलजादुर्लभं वपुराभिजात्यशंसिनी च नम्रता पाण्डुरा च मुखच्छवि
रनतिपरिभुक्तसुभगा च तनुः प्रौढतानुविद्धा च दृष्टिः। नचैषा
प्रोषितभर्त्तृका प्रवासचिह्नस्य वेण्यादेरदर्शनात्। लक्ष्म चैतद्दक्षिण
पार्श्ववर्त्ति। तदियं वृद्धस्य कस्यचिद्वणिजो नातिपुंस्त्वस्य यथार्ह
सम्भोगालाभपीडिता गृहिणी त्वयातिकौशलाद्यथादृष्टमालिखिता
भवितुमर्हतीति। स तमभिप्रशंस्याशंसत् सत्यमिदमवन्तिपुर्य्या
मुज्जयिन्यामनन्तकीर्त्तिनाम्नः सार्थवाहस्य भार्य्या यथार्थनामा नित-
म्बवती नाम। एषा सौन्दर्य्यविस्मितेन मया एवमालिखितेति। स
तद्वेषोन्मनायमानस्तद्दर्शनाय वन्तीमुज्जयिनीम्। भार्गवो नाम भूत्वा

भिक्षानिभेन तद्गृहं प्रविश्य तां ददर्श। दृष्ट्वा चात्यारूढमन्मथो निर्गत्य पौरमुखेभ्यः प्रकाशनरत्नामयाचत अभ्रमत च। तत्र लब्धेन प्रव्राजगुण्ठनपटादिभिः श्रामण्यचिह्नैरर्हन्तिकां नाम श्रमणिकामुपासांचक्रे। तन्मुखेन च नितम्बवतीमुपमन्त्रयामास। सा चैनां निर्भर्त्सयन्ती प्रत्याचचक्षे। श्रमणिकामुखाच्च दुष्करशीलभ्रंशां कुलस्त्रियमुपलभ्य रहसि दूतिकामशिक्षयत्। भूयोऽप्युपतिष्ठ सार्थवाहभार्यां ब्रूहि चैनामुपह्वरे संसारदोषदर्शनात्समाधिमास्थाय मुमुक्षमाणेमाद्दृष्टोऽजनः कुलवधूनां शीलप्रातमे घटतइति न घटते एतदपि त्वामप्युदारया सम्बद्धया रूपेणातिमानुषेण प्रथमेन वयसोपपन्नां किमितरनारीसुलभं चापलं स्पृष्टं न वेति परीक्षा। ज्ञाता तुष्टास्मि तथैव मदुष्णभावतया त्वामिदानीमुत्पन्ना त्वां द्रष्टुमिच्छामि। भर्ता तु भवत्याः केनचिद्दुर्व्याधिष्ठितः पाण्डुरोगदुर्बलो भोगे चासमर्थः क्षीणोऽभूत्। अत्र प्रायः तस्य विघ्नप्रतिहन्त्या प्रत्यक्षमात्मनम्। यतः प्रसीद वृक्षवाटिकामेकाकिनी प्रविश्य मदुपनीतस्य कस्यचिन्मन्त्रवादिनःश्शमेव स्वस्ते चरणमर्पयित्वा तदभिमन्त्रितेन प्रणयकुपिता नाम भूत्वा भर्त्तारमुरसि प्रहर्तुमर्हसि तत्र्यंसावुत्तमधातुपुष्टिमूर्जितायत्यो त्वादनक्षममासादयिष्यति अनुवर्तिष्यते देवीमिवास्तभवन्तीं नाथ इत्युक्ता कार्य्येति। सा तथेत्युक्ता यत्नमभ्युपैष्यति। तर्हि मां वृक्षवाटिकां प्रवेश्य तामपि प्रवेशयिष्यसि। तावतैव त्वयाहमनुगृहीतो भवेयमिति। सा तथैवोपपादितवती।

सोऽतिप्रीतस्तस्यामेव क्षपायां वृक्षवाटिकायां गतो नितम्बवतीं निर्यन्त्रिकाप्रयत्नेनोपनीतां पादे परामृशन्निव हेमनूपुरमेकमाक्षिप्य क्षुरिकयोरुमूले किञ्चिदालिख्य द्रुततरमपासरत्। सा तु साध्वसात्ता स्वमेव दुर्नयं गर्हमाणा जिघांसन्तीव श्रमणिकां तद्व्रणं भवनदीर्घिकायां प्रक्षाल्य दत्त्वा पटबन्धनं सामयमदेशादपरमपासनीय नूपुरं शयनपरा चिरमातुराभि दिनान्येकान्ते निन्ये। स धूर्त्तो विक्रेष्य इति तेन नूपुरेण तमनन्तकीर्त्तिमुपाससार। स दृष्ट्वा

मम मुषित्वाऽऽसवैव नूपुरः कथमयमुपलब्धव्य इति तमनुयान्तं निर्ब-
न्धेन पप्रच्छ । स तु वणिक्पुत्रामस्याये वक्ष्यामीति स्थितोऽभूत् ।
पुनरसौ श्वश्रूदूत्यै सनूपुरयुगलं प्रेषयेति सन्दिदेश । सा च
सलज्जं ससाध्वसं याता रात्रौ विश्रामप्रविष्टायाः क्रीडावाटिकायां
प्रभ्रष्टो ममैकः पश्चिमयामयोर्नूपुरः सोऽद्याप्यन्विष्टो न दृष्टः स
पुनरयं विलीयद्रव्यपरं प्राहिणोत् । अनया च वार्तयामु पुर-
स्कृत्य स वणिग्विशिष्टजनसमाजमाजगाम । स चानुयुक्तो धूर्तः
सविनयमावेदयत् विदितमेव खलु वो यथाहं गुह्यदाक्षया पितृवन
मभिरक्षन् तदुपजीवी प्रतिवसामि । गुह्याच्च कदाचिन्मदर्शन-
भीरवो निशि दहेयुरपि शवानीति निशास्वपि श्मशानमधिशये ।
अपरेद्युर्दग्धादग्धं ज्वलन्तं चितायाः प्रसभमाकर्षन्तीं श्यामाकारां
नारीमपश्यम् । अर्थलोभात्तु निगृह्य साध्वसं सा गृहीता शस्त्रि-
कयोरुमूले यदृच्छया किञ्चिदुल्लिखितम् एष च नूपुरस्तस्या दाक्षिण
चरणादेव स्खलति सा पलायिष्ट । सोऽयमस्यागमः परं भवन्तः
प्रमाणमिति । विमर्शेन च तस्याः शाकिनीत्वमेकमत्येन पौराणामभि-
मतमासीत् । भर्त्रा च परित्यक्ता तस्मिन्नेव श्मशाने बहु विलप्य
पाशेनोद्बध्य मर्तुं कामा तेन धूर्तेन नक्तमागत्य अनुनीता च ।
सुन्दरि त्वदाकारोन्मादितेन मया त्वदावर्जने बह्वनुपायान् भिक्षुकी
मुखेनोपन्यस्य तेष्वसिद्धेषु पुनरयमुपायो यावज्जीवमसाधारणीकृत्य
रन्तुमाचरितस्त्वमसीदानन्यशरणा यास्मि दासजनायेति मुक्तमुक्ता-
भरणयोर्निपत्य प्रयुज्य सान्त्वशतानि तामसावनन्यशरणामात्मवशाम-
करोत् । तदिदमुक्तं दुष्करसाधनं प्रज्ञेति ।

इदमाकर्ण्य ब्रह्मराक्षसो मामपूपुजत् । अस्मिन्नेव क्षणे
नातिप्रौढपुन्नागमुकुलस्थूलानि मुक्ताफलानि सद्यःसम्भिन्नबिन्दुभि-
रम्बरतलादपतन् । अहन्तु किंस्विदमित्यूर्ध्वचक्षुरालोकयं नभसि
राक्षसं काञ्चिदङ्गनां विचेष्टमानामाकर्षन्तमपश्यम् । कथमय-

हरति चक्षुषामपि क्षिपमनाचारो नैर्ऋतहतक गगनगमनमन्द
शक्तिरशक्यचातप्ये। स तु मत्सम्बन्धी ब्रह्मराक्षसः तिष्ठ तिष्ठ
पाप क्वापसरसीति भर्त्सयन्नुत्थाय राक्षसेन समसृज्यत। तान्तु
रोषादनपेक्षाय विद्याममरतलमञ्जरीमिवान्तरिक्षादापतन्तीमुन्मुख-
प्रसारितोभयकरः कराभ्यामग्रहीषम्। उपगृह्य च वेपमानां
सम्मीलिताक्षीं मदङ्गस्पर्शसुखेनोद्भिन्नरोमाञ्चां तादृशीमेव कामसव-
तारयन्नतिष्ठम्। तावत्तावुभावपि शैलशृङ्गभङ्गैः पादपैश्च रभसो-
न्मूलितैर्मुष्टिपादप्रहारैश्च परस्परमक्षपयेताम्। पुनरश्मति
मृदुनि पुष्पितवति कुसुमस्तबकाञ्चिते सरसीतीरेऽवरोप्य सस्पृहं
निर्वर्णयन्तीं मत्प्राणैकवल्लभां राजकन्यां कन्दुकावतीमपश्यम्।
सा हि मया समाश्वास्यमाना तिर्य्यक्षामभिनिरूप्य जातप्रत्यभिज्ञा
सकरुणमरोदीत्। अवादीच्च नाथ त्वद्दर्शनादुपोढरागा तस्मिन्
कन्दुकोत्सवे पुनः सख्या चन्द्रसेनया त्वत्कथाभिरेव समाश्वासि-
तास्मि त्वं किल समुद्रमध्ये मज्जितः पापेन मद्भ्रात्रा भीमधन्वनेति
श्रुत्वा सखीजनं परिजनञ्च वञ्चयित्वा जीवितं जिहासुरेकाकिनी
क्रीडावनमुपागमं तत्र च मामपश्यत कामरूप एष राक्षसाधमः
सोऽयं मया भीतयावधूतप्रार्थनः स्फुरन्तीं मां निगृह्याभ्यधावत्
अत्रैवमवसितोऽभूत्। अद्य च दैवात्तवैव जीवितेशस्य हस्ते पतिता
भद्रं तवेति। श्रुत्वा च तया सहावरुह्य नावमध्यारोहम्।
मुक्ता च नौः प्रतिवातप्रेरिता तामेव दामलिप्तां प्रत्युपातिष्ठत्।
अवरूढाश्च वयमश्रमेण। तनयस्य च तनयायाश्च नाशादनन्या-
पत्यस्तुङ्गधन्वा सुह्मपतिर्निर्विण्णः स्वयं सकलजनस्य निष्फलश्च
गङ्गारोधसि अनशनेनोपरन्तुं प्रतिष्ठते सह तेन मर्तुमिच्छति
अनन्यनाथोऽनुरक्तः पौरवृद्धलोक इत्यश्रुमुखीनां प्रजानामाक्रन्द-
मशृणुम। अथाहमस्मै राज्ञे यथावृत्तमाख्याय तदपत्यद्वयं प्रत्य-
र्पितवान्। प्रीतेन तेन जामाता कृतोऽस्मि दामलिप्तेश्वरेण
तत्पुत्रो मदनुजीविजातो मदाज्ञयैव चानुना प्राग्वदुज्झिता चन्द्र-

सेना चोग्रदासमेवाभजत् । ततश्च सिंहवर्म्मांसभृद्भाग्यार्थमहमागत्य भर्त्तुस्तव दर्शनोत्सवसुखमनुभवामीति ।

श्रुत्वा चित्रमिदं दैवमस्मिन्नवसरेषु पुम्भवः पुरुषकारश्चेत्यभिधाय भूयः स्मिताभिषिक्तदन्तच्छदो मन्त्रगुप्ते स्वैरं फुल्लं चक्षुः पातयामास देवो राजवाहनः । स किल करकमलेन किञ्चित् संवृताननो लम्बितवल्लभारभसदत्तदन्तक्षतव्यसनविह्वलाधरमणिर्निरोष्ठ्यवर्णमात्मचरितमाचचक्षे ।

इति दण्डिनः कृतौ दशकुमारचरिते मित्रगुप्तचरितं
नाम षष्ठ उच्छ्वासः ।

सप्तम उच्छ्वासः।

मन्त्रगुप्तचरितम्।

राजाधिराजनन्दन नगरन्ध्रगतस्य ते गतिं अन्विष्यन्नहञ्च गतः कदाचित्कलिङ्गान्। कलिङ्गनगरस्य नात्यासन्नसंस्थितश्मशानदाव स्यासन्नसंसन्नस्य कस्यचित्कान्तारधरणिजस्याधोऽशेषसरसकिसलयसं-स्तरे तल्पे निषद्य निद्राणीढदृष्टिरशयिषि। गलति च कालरात्रि शिखण्डजालकान्धकारे चरितरक्षसि स्खलितनीहारे निजनिलयनि-लीननिःशेषजने नितान्तशीते निशीथे घनतरशाखिशाखान्तराल निरुद्धं। दिनि नेत्रनिर्विशिनीं निद्रां निगृह्णन् कर्णदेशे गतं "कथं खले-नानेन दग्धसिद्धेन रिरंसाकाले निदेशं दित्सता अन्यत्र राक्षसा-नर्थेनाहितं इत्थं खलीकृत' शक्तेराख्यानकनरेन्द्रस्य केनचि-दनन्तशक्तिना सिद्धान्तरायहति" किङ्करस्य किङ्कर्यां कातिकातरं रटितम्। आकर्ण्य कस्य सिद्धः का च सिद्धिः किञ्चानेन किङ्करेण करिष्यत इति दिदृक्षाकान्तहृदयः किङ्करगतया दिशा किञ्चिदन्तरं गतः तरलतरनरास्थिशकलरचितालङ्कारकान्तकायं दहनदग्धकाष्ठ निष्ठाङ्गाररजःकृताङ्गरागं तडिल्लताकारजटाधरं हिरण्यरेतस्य रण्यचलान्धकारराक्षसे चाचगृहीतनानेन्धनग्रासलब्धदर्चिषि दक्षिणे तरेण करेण तिलसिद्धार्थकादीन्निरन्तरचटचटायितानाकिरन्तं कञ्चिदद्राक्षम्। तस्याग्रे स कृताञ्जलिः किङ्करः किं करणीयं

दीयतां निदेश इत्यतिष्ठत्। आदिष्टश्चायं तेनातिनिकृष्टाशयेन गच्छ कलिङ्गराजस्य कर्दनस्य कन्यां कनकलेखां कन्यागृहादिहानयेति। स च तथाकार्षीत्। ततश्चैनां त्रासेनाद्धीयसा सज्जर्ज्जरेण च कण्ठेन रणरणिकागृहीतेन च हृदयेन हा तात हा जननि इति क्रन्दन्तीं कीर्णम्लानशेखरस्रजि शीर्णनद्धे शिरसि जातां सचये निगृह्यासिना शिताशितेन शिरश्चिकर्त्तिषयाचेष्टत। झटिति चाक्षिप्य तस्य हस्तात्तां शक्तिकां तया निहत्य तस्य तच्छिरः सजटाजालं निकट स्थस्य कस्यचित् जीर्णसालस्य स्कन्धरन्ध्रे न्यदधम्। तन्निध्याय हृष्टतरः स राक्षसः क्षीणाधिरकथयत् आर्य्य कदर्य्यस्यास्य कर्दनाग्न कदाचिन्निद्रायाति नैव तर्ज्जयति त्रासयति आक्रोशे चाज्ञां ददाति तदस्य कल्याणराशिना साधीयः कृतं यदेष नरकाक्षः कारयाणां नारकीणां रसयातनाय नीतः शीतेतरदीधितिदेशजस्य नगरं तदेष दयानिधेरनन्ततेजसस्त्वेऽयं जनः कांचिदाज्ञां चिकीर्षति आदिशास्य कान्तकर्णेनेत्यनंसीत्। आदिशच्च तं सखे सैषा सज्जनाचरिता सरणिः यदश्रीयसि चारसेऽनश्रीयानादरः संहृश्यते। नचेदिदं नेच्छसि सेयं सन्नताङ्गयष्टिरलङ्कतार्थं सत्यनेनाकृत्यकारिणाऽयं ग्लेशिता तन्नयैनां निजनिलयं नान्यदिस किञ्चिदस्ति चिन्ताराधनं न इति।

अथ तदाकर्ण्य कर्णशेखरनीलनीरजायितां धीरेतरतारकां दृशं तिर्य्यक् किञ्चिदञ्चितां सञ्चारयन्ती सलिलधरकेतनशरासनानतां चिल्लिकालतां ललाटरङ्गस्थलीलास्यनर्त्तकीं लीलालसं लासयन्ती कपटकितरक्तनयनरेखा रागलज्जान्तरालचारिणी चरणाग्रेण तिरश्चीनमखाचिंचन्द्रिकेण धरणीतलं साचीकृताननसरसिजं लिखन्ती दन्तच्छदकिसलयलङ्घिना हृयांश्रसलिलधाराशीकरकणजालसंक्लेदितस्य घनघटचन्दनस्याद्रर्तां निरस्यता श्वासान्तरालनिःसृतेनातनीयसा निलेन हृदयसद्यादननदग्धरतिसहचरसायकस्य दयितेन तरङ्गितदशनचन्द्रिकाणि कानि चिदेतान्यक्षराणि कलकण्ठी-

कल्पान्तक्षणम् । आर्य्य केन कारणेनैनं दासजनं कापट्टकादाच्छिद्या नन्तरं रागानिलचालितरसरसिकातरङ्गितानङ्गसागरे किरसि । यथा ते चरणसरसिजरजःकणिका तथाहं चिन्तनीया यद्यस्ति दया तेऽस्य जने अनन्यसाधारणः करणीयः स एष चरणाराधन क्रियायाम् यदि च कन्यामाराध्यासने रहस्यचारखादनयं आज्ञ-ज्ञेयस नैतदपि रक्षतरा हि नक्तञ्च सम्यच्चेदाख्य यथा न कश्चिदेतत् ज्ञास्यति तथा यतिष्यन्त इति । स चाहं देवकेनाकर्णोत्कसायका-सनेन चेतस्यतिनिर्दयं ताडितसत्कटाक्षशाणायसनिगडगाढसंयत जिह्वराननिक्षिप्तहृदिरगादिदम् यथेयं रक्तचरणजघना कथ-यति तथाचिन्ताचरियं नयेत नक्तकेतनः स्वयैनैकेनाकीर्णशीर्या दशा जनवेनं सह नयानया कन्यया कन्यागृहं हरिणनयनयेति । नीत-श्चाहं निशाचरेण शारदजलधरजालकान्ति कन्यकानिकेतनम् । तत्र च काचिच्चालयन्ती चन्द्राननानिदेशाच्चन्द्रशालैकदेशे सदर्शनचलित धृतिरतिष्ठम् । सा च स्वच्छन्दतःशयाना करतलाललसशङ्खनाल-नीतनिद्राः काश्चिदधिगतार्थाः सखीरकार्षीत् । अथागत्य तावत्य निश्चितशिरसः चरदङ्कराचितलेखया निजशेखरकेसराग्रसंघट्ट चरणाग्रगतरञ्जितसंश्लथितकचशिरः शनैरकथयत् । आर्य्य यदत्या-दित्यतेजसस्ते दृशा नयनगोचरता गता ततः शान्तेन न उत्थीला दशा चेयं चिरजेन गरीयसा साक्षीकृत्य रागानलम् । तदनेना-ध्यासंश्लेषेण न शिशिरायते रक्तशैलशिलातलशिशिरं राजतरणेनाक्रि-यतां हृदयम् अस्याश्चरितार्थे सा नतं गाढालिङ्गनैः सहशतरस्य सहचरस्य चेति । ततः सखीजनेनातिदक्षिणेन हृतदरीकृतलङ्घ निशानकया सन्नताङ्ग्या सङ्गत्यारंसि ।

अथ कदाचिदाशासितजायारक्षितचेतसि आश्वसाश्रितकुन ग्लानघनकेसरे राजदरक्षस्थलीशाटकीकाचिततिलके लक्षितागकु रागाङ्कीकृतनिर्भिन्नकर्णिकारकाननान्ते दक्षिणदहनसारथिरया-हतसहकारचलचलकलिके कालाङ्गजकण्ठरागरक्तरसाधरारतिरसाय

सन्नाहशालिनि प्राचीनकन्यकान्तःकरणसंक्रान्तरागलज्जितचञ्चले मलय-
गिरितटचन्दनाश्लेषशीतलानिलाचार्यदत्तनानालतानर्तनलीले काले
कलिङ्गराजः सहाङ्गनाजनेन सह च तनयया सकलेन च नगर-
जनेन दश त्रीणि च दिनानि दिनकरकिरणजालाजालहीये रस-
दलितसहचरवल्लितलतलताग्रकिसलयालीढसैकततटे तरलतरङ्गशीक-
रासारसङ्कुलशीतले सागरतीरकानने क्रीडारसजातासक्तिरासीत्।
अथ सन्ततगीतसङ्गीतसङ्कुलाकुलासवसमाकुलाङ्गनाभिरर्गलानङ्ग
सङ्घर्षितस्य रागलग्नैकसन्ततस्य रन्ध्रे अन्ध्रनाथेन जयसिंहेन
सलिलतरसाधनानीतेनानेकसंख्येनानीकेन आगाम्याक्रम्य स-
कलत्रः स चानीयत आसन्नतरथाद्यो दयिता नः सह सखीजनेन
कनकलेखा। तदा च दाहेनानङ्गदहनजनितेनान्तर्हिताधारचिन्ता-
छिन्नायन् दयितां गणितगात्रकान्तिरित्यतर्कयं गता सा कलिङ्ग
राजतनया अनिच्छा अनयित्त्या च सद्यारिहस्ते निरस्ताधैर्यास्तां स
राजा नियतं सन्निधुक्षेत् तदसह्या च सा सती मरणरसादिना सद्यः
सन्निष्ठेत। तस्याश्च तादृशीं दशां गतायां जनस्यास्यानन्यजेन
जन्मेन शरीरधारणा सा का स्यादिति।

अथान्तरे अन्ध्रनगरादागच्छन्नग्रजः कश्चिदेव्यत। तेन चेयं
कथा कथिता। यथा किल जयसिंहेनानेकनिकारदत्तसहर्षेण
जिघांसितः स कर्दनः कनकलेखादर्शनेच्छितेन रागेणारक्ष्यत। सा च
दारिका यक्षेण केनचिदधिष्ठिता न तिष्ठत्यग्रे नरान्तरस्य आय-
स्यति च नरेन्द्रसार्थसंग्रहणेन तन्निराकरिष्यन्नरेन्द्रो न चास्ति सिद्धि
रिति। तेन चाहं दर्शिताशः प्रसृतरन्ध्रतरङ्गदेशजातस्य जरत्स्तालस्य
स्कन्धरन्ध्रान्तर्जटाजालं निष्कृष्य तेन जटिलतां गतः कस्याश्चीरसव-
यान्तरितसकलगात्रः कांश्चिच्छिष्यानग्राहयम्। तांश्च नानाश्चर्य
क्रियातिसंश्रितान्नानादाक्षस्यानचेष्टादिकामा ज्ञिव्यक्षुष्टान कार्यम्।
अथाभिगम्य दिनैः कैश्चिदन्ध्रनगरम्। तस्य नात्यासन्ने सलिलराशि
सदृशस्य कलहंससमाकदम्बितनलिनदलसंहतिगन्धितकिञ्जल्कप्रकम्प

सारस्य सारदसर्वैश्चित्रोत्तरस्य सरसस्कीरकानने श्चलनिकेतनः स्थितः श्चिन्त्यसनकचितचित्तचेरोज्वरसञ्चारनानाजनातिसन्धानदक्षः सन् दिशि दिशि कीर्त्यश्चीनेन हि यद जरदरण्यशालीसरसीतीरे स शिलाशायी यतिस्तस्य किल सकलानि सरहस्यानि सङ्कृत्यानि च छन्दांसि रक्षणाये सन्निहितानि चत्यारि च शास्त्राणि येन यानि न जायन्ते स तेषां तत्त्वाश्रयादर्शनियन्तं करिष्यति । अतस्तेन नास्त्यास्यं संशय्यते । शशरीरत्वेन दयाराशिः सततं यद्येषाय चिरं चरितार्थां दीक्षा तत्तदाराराध्याः केचन शिरः सिसीर्वैरनेकशस्तनेक जातरुधिरं छिन्नाङ्गेतरसंघाताः संहृताः तदङ्गिरूणात्सलिलसंसेकेनिंश्चलाङ्गशिरसो गतश्रिया अथोनैकेनाखिलनरेन्द्रचलनचालितनरा-रयाः । न तस्य शक्यं प्रत्येकिं यथाख्यानं नयास्याश्चरकथितेति ।

सा चेयं कथा नैकजनान्तःसञ्चारिणी तस्य कनककलेखाधिष्ठानघनदानाकरनिराशियातिसङ्खेतसः चाभिनयस्याकर्णनायाकलत् । सञ्चारचरान्नयादरेणातिनरोयसाधंयद्यथैव शिष्यान् संन्यस्याधिगततया कदाचित्काङ्क्षितार्थसाधनाय शनैरयाचिष्ट । श्यानधीरः स्नानदर्शितस्थानसन्निधिचरेन निरीक्ष्य निशायाकथयं तात स्नानयत चिरं यत्र कस्य चित् कन्यारत्नस्य सकलकन्यानन्यसाधारणेरधिगतिः क्षीरसागररसनाश्रङ्कृतायाः गङ्गादिनदीसहस्रधारयष्टिराजितायाः धराङ्गनायाः एवासादनाय साधनन् । न च स यद्याश्रदधिष्ठायी केनचिच्चरेन्द्रेण तस्या नीलाचितनीलनीरजदर्शनायाः दर्शनं सहते तदत्र सहस्रनां नीयश्चाणि चेरत्वं यतिश्चिद्यथंस्यास्य साधनायेति ।

तथादिष्टे च सहते शितीक्षे गते निशि निशि निर्निद्राकराचिंशि नीरन्ध्रान्धकारजनिचरनिगीर्णदशदिशि निशानिशक्तितनिखिलजनदृशि निर्गत्य जलतलनिलीननागाङ्गनीयं नीरन्ध्रं छन्नाङ्कितनीलतान्तराले तदेकतः शरस्कटे तीर्थसन्निकृष्टे केनचित् खननसाधनेनाकार्षम् । घननिशितेरढकाचनार्चिष्मानं तनीरदेवं अनेरस्राङ्गनीयं निश्चित्य दिनादिकानतिनिर्गत्याचरा नक्षत्रसन्तानचारचरडान्नयचितरतं

घनदान्धकारमन्यायच्छिदारणैककेसरिणं जनकनीयकञ्चुकिकुलस्य क्रीडानटं गगनसागरसलिलकञ्चराजितकृष्णैकनयनं कार्याकार्यसाक्षिणं सहसार्चिषं सहस्रादिगञ्जनाङ्कुरागरागायितशिखरचञ्चानां रजनीरजाङ्गाधिनाराध्य निशानिकेतनं न्यशिश्रयम् ।

याते च दिवसत्रये अस्तगिरिशिखरगैरिकतटसाधारणच्छाय तेजसि चञ्चरीककन्याकदर्थनयान्तरितान्येन ग्रहरशरीरेण संकटायाः सन्ध्याङ्गनायाः रक्तचन्दनचर्चितैकस्तनकलशदर्शनीये दिनाधिनाथे जनाधिनाथः स चागत्य जनस्यास्य चरणेन्द्रचापचरणनखकिरणच्छादितकिरीटः सताञ्जलिरतिष्ठत् । आदिष्टश्च दिष्ट्या दृष्टेष्टसिद्धिः ग्रह जगति हि न निरीक्षदेशिनं श्रियः संश्रयणे श्रेयांसि च सकलान्यनलसानां हस्ते नित्यसान्निध्यानि यतस्ते साधीयसा चरितेनानाकलितकलङ्केनार्जितेनाल्यादरदर्शितेनाऽकृष्टचेतसा जनेनानेन सरल्लया संश्रुतं यथेह तेऽद्य सिद्धिः स्यात् । तदेतस्यां निशि गतदर्शायां आह्वानीयं आह्वानानन्तरश्च सन्निधातव्ये सततगतीनन्तःसञ्चारिकः सन्निगृह्य यथाशक्ति शय्या कार्या ततश्च तटरुक्षचिताञ्जनच्छविरजनजनकाञ्चनचितदलकण्ठकाशदचितदेहराजहंसचाससकर्णेररतिततसन्दर्शकर्णासा जनस्य चक्षुरादानर्हणीयं जनियते जनसङ्घातस्य किञ्चिदारटितम् । प्राप्ते च तत्र सन्निकरटिते क्षिप्रमाणः किञ्चिदारक्तदृष्टिर्येनाकारेण निर्यास्यसि निपात्य तं निखिलजननेत्रानन्दकारिणं न स यक्षः ग्रस्यत्यग्रतः स्थितये स्थिरतरनिश्चितस्य च ग्रहस्यानिराकृतस्य कन्यकाहृदयं चात्येनैकेनासहनीयदर्शनान्तरायं स्यात् । अस्याश्च धराङ्गनाया नात्याहतनिराकृतादिघर्षं चक्षं करतलगतं चिन्तनीयं न तत्र संशयः । तथेदिव्यस्यानेकशास्त्रज्ञानधीरधिषणैरधिज्ञैरचिरतरेण छिलैर्विधिभिराकलय्य जानिकजनानालय्य अन्तरङ्गनरजातेर्येचेष्टहृष्टान्तराणां सरः क्रियेत रक्षा च तीरात् निरस्तकान्तरालेन सैनिकजनेन सादरं रचनीया । कन्याच तस्याराति यच्छिद्रे चारयच्चिकीर्यन्नीति । तच्चेतस्य हृदयचारि

ज्ञातं तदधिकृत्यैव तत्र सख्ये रत्नदर्शनासक्तेरिच्छया राज्ञः कन्या- कानिरागजनितां नितान्तनिश्चला निखिलार्थस्य न निषिद्धः। तथास्थितश्च सदानादनङ्गराग्यश्च स चाग्न्यायीत। राजन्न ते जनान्ते चिरं स्थितं न चेदस्य चिरस्थानं नः क्षमम्। इतश्चान्यथैव न शक्नोसि यस्य ते राष्ट्रे ग्रासाच्छादनादि तस्य ते किंचिदनागस्यं कार्यं गतिरान्यं गच्छेति तच्चैतच्चिरस्थानस्य कारणं तथापि सिद्धं गच्छ गृहान् यथार्हजनेन सहगन्धेन स्नातः सितसिताङ्गरागः प्रति सहस्रेण दानेनाराधितधरणिसुरसंततिरिन्द्राक्षितार्थं शशिसितयज्ञाय रचितचेलाञ्चलग्रहणाभिषिक्तासक्तनाङ्क्षितैरन्धकाररात्रिचराग्रयायं सिद्धये यतेथा इति। स किल तत्रत्यो दर्शितसिद्धिरेषा सिद्धि र्दत्तसन्निधिरिच्छार्थोक्ता कष्टा चेयं निःसङ्गता या निरागसं दासजनं त्याजयति नच निषिद्धनीया गरीयसी सिद्धिरिति स्नानाय गृहानया- सीत्। अथ च निर्गत्य निर्जने निशीथे सरसस्तीररन्ध्रनिलीनः सन्नीच स्थिरदत्तकर्णः स्थितः स्थिते चार्द्धरात्रे तत्तथादिष्टक्रियः स्नाने स्नानरचितरक्षः स राजा आश्रितजनानानीय निराकृतान्तःशल्यं शङ्काहीनः सरःसन्निधिं सखीजनसहितश्चाहत। गतश्च कीर्णकेशं संवृतकर्णनासिकं सरसस्तस्य शाखिनस्य गलकीलकया नीरनिलीनया तं तथाध्ययनं कन्दरायां न्ययच्छीयम्। खरतरसात्कालदक्षघट्टनाति चलैश्च करचरणघातैर्निर्दयदत्तनियमः स्वयमेवैकेनाकृष्टास चेष्टां ततश्चाकृष्य तच्छरीरं छिद्रे निधाय नीरान्निरयासिषम्। सद्यः सङ्कुलाच्च सैनिकानां तदत्यचिन्ताकारान्तरग्रहणम्। अग्र स्नान्ध्यगतः सितस्रक्चन्दनादिसकलराजचिह्नराजितस्तत्कृतरक्षिदक्षता- ङ्कनच्छलजनदत्तान्तरया राजरथ्यया यातश्चात्र निशां नयननिरस्त निद्राकलिरनैषम्। नीते च जनस्याधिकालाचारसदिग्धदिग्ध गिरःसदसि शशिकिरणनिकरादर्शं चकर्षयन्तं तत्करदायिनः किरात जनकराङ्कदराजिराजितराजार्हसनाथासौ दयासहस्राचार दर्शिनः शङ्कायत्तिताकृतान् सन्निधिनिषादिनः सहायानग्राहिषम्।

दृश्यतां शक्तिरार्थी यत्तस्य धनेरन्येयस्ते श्रियायां संस्कारेण नीरजसा नीरजसान्निध्यलालिनि सहर्षलालिनि सरसि सरसिजदलसन्निभाक्षच्छायस्याधिकतरदर्शनीयस्याकारान्तरस्य सिद्धिरासीत् । अथ सकल नागरिकाणां जायेत सञ्जातं शिरः तदिदानीं चन्द्रशेखर गरलाशन सरसिजासनादीनां त्रिदशेशानां स्थानान्यादरचितस्वस्तिगीताराधनानि क्रियन्तां ध्रियन्तां च गृहादितः क्षेमगिरसनसंघान्यर्थिसार्थध्वंसानीति । आचार्यरसासिरेकहस्तस्ते जय जगदीश सतेज सातिशय्य दश दिशः स्वयशश्छिन्नेन यत्प्रसादिताशयश्चासि इत्यसकृदाशास्याथ रत्नपादिष्टाः क्रियाः । तथाहं दयितायाः सखीं हृदयस्थानीयां शशाङ्कसेनां कन्यकां कदाचिद्दर्शनान्तरागतां रहस्याचचक्षि चक्षिदयं जनः कदाचिदासीदृष्ट इति । अथ सा हर्षकाष्ठाकुलेन हृदये नेत्रदानशरदशानदीक्षितिलतां श्रीमान्सां जानयन्ती जलिताश्रितकरशाखान्तरितवदनाच्छदकिसलया हर्षजलक्लेदजर्जरं निरङ्गनेत्रया । रचिताञ्जलिर्निःसरां जाने यदि न स्यादिन्द्रजालिकस्य जालं किञ्चिदेतादृशं कथञ्चैतत्कथयेति स्वे हृदिनियन्तृत्वं शनैरगादीत् । अथ हास्ये कान्तेन्द्रनास्याय तदाननसन्निधानेन सन्देशेन सञ्जगच्य सञ्चर्यालिनिरतिशयं हृदयाह्लादम् सतृष्णया दयितया निरर्गलीकृतातिसत्कृतकालिङ्गनायन्याय दत्तया सद्भावस्थान्ध्रकालिङ्गराज्यं कालिङ्गनाथे न्यासं तस्यार्थादिना क्षितिहृद्धिविलतस्यान्ध्रराजस्य साहाय्यकार्ययोरेकीयता साधनेनागस्याम । ते सखिजनसञ्जुलस्य याद्दक्षिणदर्शनानन्दरागिलक्षितचेताज्ञात इति । तस्य तच्चरितं निशम्योत्थाभिषिक्तदन्तच्छदः सह सुहृद्भिरभिनन्द्य चित्रमिदं सङ्गानुगैरेकं ततश्चैव खलु प्रस्थितमतिकष्टं समनुष्ठितं तु तावत्कर्म ह्यांपुरुषयंस्तयोः प्रश्रासतस्योर्ष्टमिव अनपहिन्यभिधाय पुनरवतरतु भवानिति अञ्चते विश्रुते विश्रान्तरागीव सहर्षं दृशं चिक्षेप देवो राजवाहनः । सोऽप्याचचक्षे ।

इति दण्डिनः कृतौ दशकुमारचरिते मन्त्रगुप्तचरितं
नाम सप्तम उच्छ्वासः ।

विश्रुतचरितम् ।

देव मयापि परिभ्रमता विन्ध्याटव्यां कोऽपि कुमारः क्षुधा तृषा च क्लिश्यन् क्षामतरः कश्चित्कूपाभ्यासेऽष्टवर्षदेशीयो दृष्टः । स च सास्रगद्गदमगदत् । महाभाग क्लिष्टस्य मे क्रियतामार्य साहाय्यकम् । अस्य मे प्राणापहारिणीं पिपासां प्रतिकर्तुमुदकमुदञ्चन्निह कूपे कोऽपि निष्कृपो ममैकशरणभूतः पतितः तमप्यक्षमोऽहमुद्धर्तुमिति । अथाहमभ्येत्य लतया कयापि वृद्धमुत्तार्य तं च बालं वंशनालीमुखोद्धृताभिरद्भिः फलैश्च पक्वैः प्ररूढोपान्ति-तस्य लिकुचवृक्षस्य शिखरात्पाणिपातितैः प्रत्यानीतप्राणशक्तिमापाद्य तदवस्थानिमित्तं तमब्रवम् । तात कश्चायं वृद्धः को वा भवान् कथं चेयमापदापन्नेति । सोऽश्रुगद्गदमगदत् श्रूयतां महाभाग ।

विदर्भो नाम जनपदस्तस्मिन् भोजवंशभूषणमंशावतार इव धर्मस्यातिसत्त्वः सत्यवादी वदान्यो विनीतो विनेता प्रजानां रञ्जितभृत्यः कीर्तिमानुदग्रो बुद्धिमूर्तिभ्यामुत्थानशीलः शास्त्रप्रमाणकः शक्यभव्यकल्पारम्भी सम्भावयिता बुधान् प्रभावयिता सेवकानुद्भावयिता बन्धून् न्यग्भावयिता शत्रून् असम्बद्धप्रलापेष्वदत्तकर्णः कदाचिदप्यवितृष्णो गुणेष्वतिनदीष्णः कलासु नेदिष्ठो धर्मार्थसंहितासु स्वल्पेऽपि सुकृते सुतरां प्रत्युपकर्त्ता प्रत्यवेक्षिता कोशवाहनयोर्यत्नेन

परीक्षिता सर्व्वाध्यक्षाणाम् उत्साहयिता शतकर्म्मणाम् अनुरूपैर्दानमानैः सद्यः प्रतिकर्त्ता दैवमानुषीणामापदां षाड्गुण्योपयोगनिपुणो मनुमार्गेण प्रणेता चातुर्व्वर्ण्यस्य पुण्यश्लोकः पुण्यवर्म्मा नामासीत्। स पुण्यैः कर्म्मभिः प्राप्य पुरुषायुषं पुनरपुण्येन प्रजानामगण्यतामरेषु। तदनन्तरमनन्तवर्म्मा नाम तदायतिरवनिमध्यतिष्ठत्। स सर्व्वगुणैः सम्पन्नोऽपि दैवाद्दण्डनीत्यां नात्यादृतोऽभूत्। तमेकदा रहसि वसुरक्षितो नाम मन्त्रिवृद्धः पितुरस्य बहुमतः प्रगल्भवागभाषत। तात सर्व्वैवात्मसम्पदभिजनात् प्रभृति अन्यूनैवात्रभवति अलाते बुद्धिश्च निसर्गपट्वी कलासु नृत्यगीतादिषु चित्रेषु च काव्यविस्तरेषु प्राप्तविस्तारा तवेतरेभ्यः प्रतिविशिष्यते। तथाप्यसावप्रतिपद्यात्मसंस्कारमर्थशास्त्रेष्वनभियोगात् भिन्नेव हेमजातिर्नातिभाति बुद्धिः। बुद्धिहीनो हि भूभृदत्युच्छ्रितोऽपि परैरध्यारुह्यमाणमात्मानं न चेतयते न च शक्तः साध्यं साधनं वा विभज्य वर्त्तितुम्। अयथावृत्तश्च कर्म्मसु प्रतिहन्यमानः स्वैः परैश्च परिभूयते। न चावज्ञातस्याज्ञा प्रभवति प्रजानां योगक्षेमाराधनाय। अतिक्रान्तशासनाश्च प्रजा यत्किञ्चन वादिन्यो यथाकथञ्चिद्वर्त्तिन्यः सर्व्वाः स्थितीः सङ्किरेयुः निर्म्मर्यादश्च लोको लोकादितोऽमुतश्च स्वामिनमात्मानञ्च भ्रंशयेत्। आगमदीपदृष्टेन खल्वध्वना सुखेन वर्त्तते लोकयात्रा। दिव्यं हि चक्षुर्भूतभवद्भविष्यत्सु व्यवहितविप्रकृष्टादिषु च विषयेषु शास्त्रं नामाप्रतिहतवृत्ति तेन हीनः सतोरप्यायतविशालयोर्लोचनयोरन्ध एव जन्तुरर्थदर्शनेष्वसामर्थ्यात्। अतो विहाय बाह्यविद्यास्वभिषङ्गमागमय दण्डनीतिं कुलविद्यां तदर्थानुष्ठानेन चावर्जितशक्तिसिद्धिरस्खलितशासनः शाधि चिरमुदधिमेखलामुर्व्वीमिति।

एतदाकर्ण्य ध्यानमेव गुरुभिरनुशिष्टं तथा क्रियतइत्यन्तःपुरमविशत्। तत्र च वार्त्तां पार्थिवेन प्रमदासन्निधौ प्रसङ्गेनोदीरिताम् उपनिशम्य समीपोपविष्टः चित्तानुवर्त्तिकुशलः प्रसादवित्तो गीत नृत्यवादित्रादिष्ववाप्तो। वाग्मिनामग्रीपरायणः पटुरपस्मितमुखो बहु

भङ्गिविशारदः परमर्म्मान्वेषणपरः परिहासविता परिवादरुचिः पैशुन्यपण्डितः सचिवमण्डलादप्युल्लेखहारी सकलदुर्नयोपाध्यायः कामतन्त्रकर्णधारः कुमारसेवको विहारभद्रो नाम स्मितपूर्व्वं व्यज्ञापयत् । देव दैवानुग्रहेण यदि कश्चिद्भाजनं भवति विभूतेस्तम-तस्मादुपायवचनप्रलोभनैः कदर्थयन्तः स्वार्थं साधयन्ति धूर्त्ताः । तथाहि । केचिल्लेख्य किल गर्भेऽभ्युदयाशिषायै राज्ञामुत्पाद्य मुण्डयित्वा शिरो बद्ध्वा दर्भरज्जुभिरजिनेनाच्छाद्य नवनीतेनोपलिप्यानशनञ्च ग्राहयित्वा सर्व्वस्वं स्वीकरिष्यन्ति तेभ्योऽपि घोरतराः मायाविनः पुत्रदारशरीरजीवितान्यपि मोचयन्ति । यदि कश्चित्पटुजातीयो नाम्ने स्वराष्ट्रविद्यायै चक्रमतं व्यतुमिच्छेत् तमन्ये परिवार्य्याहुः । एकामपि काकिणीं कार्षापणलक्षमापादयेम शस्त्रा हते सर्व्वशत्रून् घातयेम एकशरीरमात्रमपि मर्त्यं चक्रवर्त्तिनं विदधीमहि यद्यस्मद्दृष्टेन मार्गेण वर्त्तते इति । स पुनरिमान् प्रत्याह कोऽसौ मार्ग इति । पुनरिमे ब्रुवते । ननु चतस्रो राजविद्या त्रयी वार्त्ता आन्वीक्षिकी दण्डनीतिरिति तासु तिस्रस्त्रयीवार्त्तान्वीक्षिक्यो महत्यो मन्दफलाश्च तास्तावदासताम् अधीष्व तावद्दण्डनीतिम् इयमिदानीमाचार्य्यविष्णुगुप्तेन मौर्य्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता सैवेयमधीत्य सम्यगनुष्ठीयमाना यथोक्तकर्म्मक्षमेति । स तथेत्यधीते शृणोति च तथैव गतां गच्छति । ननु किल शास्त्रं शास्त्रान्तरानुबन्धि सर्व्वमेव वाङ्मयमविदित्वा न तत्त्वतोऽधिगंस्यते । भवतु कालेन बहुनाप्येन वा तदर्थाधिगतिः । अधिगत शास्त्रेण चादावेव पुत्रदारमपि न विश्वास्यम् । आत्मकुक्षेरपि शाले तण्डुलैरियद्भिरियानोदनः सम्पद्यते इयत ओदनस्य पाकाये-तावदिन्धनं पर्य्याप्तमिति मानोन्मानपूर्व्वकं देयम् । उत्थितेन च राज्ञा क्षालिताक्षालिते मुखे मुष्टिमर्द्धमुष्टिं वाभ्यन्तरीकृत्य कृत्स्नमायव्ययजातम् अह्नः प्रथमेऽष्टमे भागे श्रोतव्यम् शृण्वतस्तस्य द्विगुणमपहरन्ति तेऽध्यक्षधूर्त्ताः चत्वारिंशतं आत्मकोपदिष्टाना-

हरस्योप्रायान् सहस्राध्याक्षानुद्दिश्य ते विकल्पयितारः। द्वितीये
ऽन्योन्यं विवदमानानां प्रजानामाक्रोशैर्दह्यमानकर्णः कष्टं जीवति।
तथापि प्राड्विवाकादयः स्वेच्छया जयपराजयौ विवादधनाः प्रायेणा-
र्जयन्ति ज्ञ भर्त्तारमात्मनश्च अर्थैर्योजयन्ति। तृतीये स्नातुं भोक्तुञ्च
लभते भुक्तस्य यावदन्नपरिणामस्तावदस्य विषभयं न शाम्यत्येव।
चतुर्थे हिरण्यप्रतिग्रहाय हस्तं प्रसारयन्नेवोत्तिष्ठति। पञ्चमे
मन्त्रचिन्तया महान्तमायासमनुभवति। तथापि मन्त्रिणो मध्यस्था
इवान्योन्यं मिथः सम्भूय दोषगुणौ दूतचारवाक्यानि शक्याशक्यतां
देशकालावस्थाञ्च स्वेच्छया विपरिवर्त्तयन्तः स्वपरमित्रमण्ड-
लान्युपजीवन्ति बाह्याभ्यन्तरांश्च कोपान् गूढमुत्पाद्य प्रकाशं प्रशम-
यन्त इव स्वामिनमवशमवष्टभ्नन्ति। षष्ठे स्वैरविहारो मन्त्रो वा
सेव्यः सोऽस्यैतावान् स्वैरविहारकालो यस्य नित्य क्षिपादोनघटि-
काद्विकाः। सप्तमे च चतुरङ्गबलप्रत्यवेक्षणप्रयासः अष्टमेऽस्य
सेनापतिसखस्य विक्रमचिन्ताक्लेशः पुनरुपास्यैव सन्ध्यां प्रथमे रात्रि
विभागे गूढपुरुषा द्रष्टव्याः तन्मुखेन चातिनृशंसाः शस्त्राग्निरस
प्रणिधयोऽनुष्ठेयाः द्वितीये भोजनानन्तरं श्रोत्रिय इव स्वाध्याय-
मारभते। तृतीये तूर्य्यघोषेण संविष्टः चतुर्थपञ्चमौ शयीत किम
कथमिवास्याजस्रचिन्तायासविक्लवमनसो वराकस्य निद्रासुखमुप-
नमेत। पुनः षष्ठे शास्त्रचिन्ताकार्य्यचिन्तारम्भः। सप्तमे तु मन्त्र
ग्रहो दूताभिप्रेषणानि च। दूता हि नामोभयवेतना प्रियाख्यानलब्धा-
र्थान् शीतस्फुलिङ्गवाधवर्त्मानि वर्णिन्यया वर्धयन्तः कार्य्यमविद्यमान-
मपि जैह्मेनोत्पादयानवरतं भ्रमन्ति। अष्टमे पुरोहितादयोऽभ्ये-
त्यैनमाहुः अद्य दृष्टो दुःस्वप्नः दुःस्थिता ग्रहाः शकुनानि
चाशुभानि शान्तयः क्रियन्तां सर्व्वमस्तु सौवर्णमेव होमसाधनम्
एवं सति कर्म्म गुणवद्भवति ब्रह्मकल्पा इमे त्रायम्बकाः स्वस्तमेभिः
स्वस्त्ययनं कल्याणतरं भवति। ते चामी कष्टदारिद्र्या बहुपत्या
यजमानैर्वीर्य्यवन्तश्च यथाप्रयोगप्रतिग्रहा दक्षिणाभिः सर्व्वमायुष्य-

सरित्पतिनाथनस्य भवतीति बहु बहु दापयित्वा तन्मुखेन स्वयमुपांशु भक्षयन्ति। तदेवमप्रतिप्रमविच्छिन्नसुखलेशमायासबहुलम् अविरलकदर्थनस्य नयतो नयज्ञस्याकान्ता चक्रवर्त्तिता स्वमनस्तत्त्वमात्रमपि दुरारक्षं भवेत्। शास्त्रसमाम्नातो हि यददाति यन्नाशयति यत्प्रियं ब्रवीति तत्सर्व्वं मतिसन्धानुसिद्धविश्वासः अविश्वासश्च हि जन्मभूमिरलक्ष्म्याः यावता च नयेन विना न लोकयात्रा स लोकत एव सिद्धः नात्र शास्त्रेणार्थः स्तनन्धयोऽपि हि तैस्तैरुपायैः स्तनपानं जनन्या लिप्सते। तदपास्यातियन्त्रणामनुभूयन्तां यथेष्टमिन्द्रियसुखानि येऽप्युपदिशन्ति यदिन्द्रियाणि जेतव्यानि इत्यमरिषड्वर्गस्त्याज्यः सामादिरुपायवर्गः स्वेषु परेषु चाजस्रं प्रयोज्यः सन्धिविग्रहचिन्तयैव नेयः कालः स्वल्पोऽपि सुखस्यावकाशो न देय इति तैरप्येभिर्मन्त्रिबकैर्युष्मत्सेवोपार्ज्जितं धनं दासीगृहेष्वेव भुज्यते। के चैते वराकाः येऽपि मतिकर्कशाः स्वभावाः शुक्राङ्गिरसविशालाक्षबाहुदन्तिपुत्रपराशरप्रभृतयस्तैः किमरिषड्वर्गो जितः कृतं वा तैः शास्त्रानुष्ठानम् तेऽपि हि प्रारब्धेषु कार्य्येषु दृष्टे सिद्ध्यसिद्धी पठन्तश्चापठद्भिरतिसन्धीयमानाः बहवः नन्विदमुपपन्नं देवस्य यदुत सर्व्वलोकस्य वन्द्या जातिरयातयामं वयो दर्शनीयं वपुरपरिमिता विभूतिः। तत्सर्व्वं सर्व्वाविश्वासहेतुना सुखोपभोगप्रतिबन्धिना वञ्चमार्गविकल्पनात् सर्व्वकार्य्येष्वनुजीविसंश्रयेण तथाव्यापेन माऽस्तु यथा सन्ति ते दन्तिनो दश सहस्राणि अश्वानां लक्षम् अनन्ताश्च पादाताः अपि च पूर्व्वान्वयैः हेमरत्नैः कोशामलक्षाणि सर्व्वस्यैव जीवलोकस्य समग्रमपि युगसहस्रं भुञ्जानो न ते कोष्ठागाराणि रेचयिष्यति। किमिदमपर्य्याप्तं यदन्याभ्यर्जनायायासः क्रियते। जीवितं हि नाम जन्मवतां चतुःपञ्चान्यहानि तथापि भोगयोग्यमल्पाल्पं वयःखण्डम् अपहितवाः पुनरर्जयन्तस्तव ध्वंसन्ते नार्जितस्य वस्तुनो लवमप्यास्वादयितुमीशते। किं बहुना राज्यभारं भारक्षमेष्वमात्यरत्नेषु भक्तिमत्सु समर्थ्याप्सरःप्रतिरूपाभिरन्तःपुरिकाभी

रममाणो गीतसङ्गीतपानगोष्ठीश्च यथर्तु बबन्ध यथार्थं कृतशरीरश्रममिति पश्चाद्गीतसम्भूमिरत्नशिलापुष्पितपृष्ठशिखरमसेवत। प्राहलीच प्रीतिपक्षपातेनान्तःपुरप्रमदाजनः। अनन्तवर्मा सक्षितम् तस्मिन् ननु क्षितिपदेशाकुरवो भवन्तः किमिति गुरुतर विपरीतमनुष्ठितमिति समुत्थाप्य क्रीडाभिर्भरमतिष्ठत्।

अथैतेषु दिनेषु भूयोभूयः प्रस्तुतेऽर्थे प्रेर्यमाणो मन्त्रिवृद्धेन वचसाभ्युपेत्य मनसैवाचिन्तयदसत्यवाचालवान्। अथैवं मन्त्रिणो मनस्यभूत्। अहो मे मोहादाभिजात्यम् अस्य चिरेऽर्थे चोदयन्नर्थीवाहितोऽस्य मन्त्राणि चोऽन्नाता स्वकर्मस्य चेष्टानामामचापूर्व्वम्। तथाहि न मां स्निग्धं पश्यति न स्मितपूर्वं भाषते न रहस्यानि विवृणोति न हस्ते स्पृशति न व्यसनेष्वनुकम्पते नोत्सवेष्वनुमोदते न विलोभनवस्तु प्रेषयति न सुकृतानि प्रशंसयति न मे गृहवार्त्तां पृच्छति न मत्पक्षान् पक्षपातेन पश्यते न मामासन्नकार्येष्वभ्यन्तरीकरोति न मामन्तःपुरं प्रवेशयति। अपि च मामनर्हेषु कर्मसु नियुङ्क्ते मदासनमन्यैराक्रम्यमाणमनुजानाति मद्वैरिषु विश्रम्भं दर्शयति मदुक्तस्योत्तरं न ददाति मत्समानदोषान्धिक्करोति मर्माणि मामुपहसति मम मतमपि मया वक्ष्यमाणं प्रत्यवस्थापयति मत्कृतानि वस्तूनि संप्रक्षितानि नाभिनन्दति मत्प्रणामं स्खलितानि ममानयो मूर्खैर्वहासयति। सत्यमाह चाणक्यः चित्तज्ञानानुवर्तिनोऽनर्थां अपि प्रियाः स्युः दक्षिणा अपि तद्भावबहिष्कृता द्वेष्या भवेयुरिति। तथापि का मतिरविनीतोऽपि न परित्याज्यः पितृपैतामहैरस्माद्वंशीरयमधिपतिः। अपरित्यजन्नोऽपि असुपकारमप्यमावाचः कुर्मः। सर्वथा नयज्ञस्य वसन्तभानोरश्मकेन्द्रस्य हस्ते राज्यमिदं पतितम् अपि नामापदो भाविन्यः प्रकृतिमस्मिन्नेनमापादयेयुः। अनर्थेषु सुलभव्यलीकेषु क्वचिदुत्पन्नोऽपि द्वेषः सद्यस्समक्षे न रोपयेत्। भवतु भविता तावदनर्थः कस्मिंश्चिदपि शुनशिक्षे। यथाकथञ्चिदस्मत्पदस्थितेयमिति।

एवं गते मन्त्रिणि राजनि च कामवशे चन्द्रपालितो नामामात्य-
श्रेष्ठस्येन्द्रपालितस्य सूनुरसद्वृत्तः पितृनिर्वासितो नाम भूत्वा
बहुभिश्चारणैर्वंशीभिरनल्पकौशलाभिः शिल्पकारिणीभिरनेकश्च
विटैश्च गूढपुरुषैः परिवृतोऽभ्येत्य विविधाभिः क्रीडाभिर्विहार-
भद्रमात्मसादकरोत्। अमुना चैव संक्रमेण राजन्यास्पदमलभत।
आरभ्य च स यद्यद्व्यसनमारभते तत्तदेवावर्णयत्। देव यथा
मृगया ह्युपकारिणी न तथान्यत् अत्र हि व्यायामोत्कर्षादपटूप-
कर्षः। दीर्घाध्वलङ्घनक्षमो जङ्घाजवः कफापचयादारोग्यमूष्म-
मात्रयाग्निदीप्तिः मेदोऽपकर्षादङ्गानां स्थैर्यकार्कश्यातिलाघवादीनि
शीतोष्णवातवर्षक्षुत्पिपासासहत्वं सत्त्वानामवस्थान्तरेषु चित्तचेष्टित-
ज्ञानं हरिणगवयगवयादिवधेन शस्योपप्रतिक्रिया व्याघ्रादि-
घातेन स्थलपथप्रशोधनं शैलाटवीप्रदेशानां विविधकर्म्मक्षमाणा-
मालोचनम् आटविकवर्गविश्रम्भणम् उत्साहशक्तिसन्धुक्षणेन प्रत्य-
नीकविघातसमर्थमिति बहुतमा गुणाः। द्यूतेऽपि द्रव्यराशेः क्षणमात्रा-
दनुपमानमाश्चर्योदार्यं जयपराजयानवस्थानाद्धर्षविषादयोरविधेय-
त्वं पौरुषैकनिमित्तस्यामर्षस्य वृद्धिः अक्षहस्तभूम्यादिगोचराया-
मत्यन्तदुरुपलक्ष्यायां कूटकर्म्मणामुपलक्षणादनन्तबुद्धिनैपुण्यम्।
एकविषयोपसंहाराच्चित्तस्यातिचित्रमैकाग्र्यम् अध्यवसायसहचरेषु
साहसेष्वभिरतिः अतिकर्कशपुरुषप्रतिसंसर्गादनन्यधर्षणीयता
मानावधारणनष्टपणस्य शरीरयापनमिति। उत्तमाङ्गनोपभोगे-
प्यर्थधर्म्मयोः सफलीकरणं पुंस्त्वं पुरुषाभिमानः भावज्ञानकौशल-
मभिलषितमाचेष्टितम् अखिलासु कलासु वैचक्षण्यम् अवक्षेप-
अभिव्यक्तानुरक्तापरक्तोपभोगमुक्तानुसन्धानरुष्टानुनयादिक्रम-
मभ्युपायरचनया बुद्धिवाचोः पाटवम् उत्कृष्टशरीरसंस्कारात् शुभग-
वेषतया लोकसम्भावनीयता परं सुहृत्प्रियत्वं गरीयसो परिजन-
स्यापेक्षा स्मितपूर्वाभिभाषित्वम् उत्सिक्तसत्त्वता दाक्षिण्यानुवर्त्तनम्
अपत्योत्पादनेनोभयलोकश्रेयस्करत्वमिति। पानेऽपि नानाविधरोग

भ्रूकुटीवक्रा मानवतीनामासेवनात् स्पृहणीयवयोऽवस्थापनम् अह-ङ्कारप्रकर्षो दर्पोन्मदः दुःखतिरस्करणम् अङ्गरागदीपनादङ्गोपभोग प्रतिसम्मुखम् अपराधप्रमार्ज्जनमात्मनः प्रत्ययोत्पादनम् अन्यास शङ्किभिरनर्थ्यप्रत्यपेक्षितां कोपकर्षणम् मत्सरानुबन्धादानन्दैक-तानतः प्रत्यादीनामभिज्ञियार्थानां सातत्येनानुभवः संविभागशील-तया सुहृद्वर्गसंवर्द्धनम् अनुपमानमङ्गलावस्थाम् अनुसरामि विल-सितानि भवति किं चरमाश्च कार्यामिकत्वमिति । वाक्पारुष्यं दण्डो दारुणो दूषणानि आर्त्तानामेव यथायथमेवोपकारकाणि । नहि सुनिशित नखपतितपग्रमदितिं अभिभवितुमरिकुलममलम् अवगन्तुश्च शोऽक्षमत्वमिति ।

असावपि गुरूपदेशमिवास्यादरेण तस्य मतमन्ववर्त्तत तच्छी-लानुसारिण्यश्च प्रकृतयो विपद्द्रुममसेवन्त व्यसनानि सर्व्वाश्च समानदोषतया न कश्चित्छिद्रान्वेषणायायतिष्ट समानभर्त्तृप्रकृत-यःस्वान्याख्यानि कर्म्मवर्त्मान्यभ्यधायन् । ततः क्रमादायदाराणि कर्षीयांसि व्ययमुखानि विटविधेयतया विभोरश्वरस्य वर्द्धन्त सामन्तपौरजानपदमुख्याश्च समानशीलतयोपारूढविश्रम्भेण राज्ञा सम्मानिताः पानगोष्ठीष्वभ्यर्चिताः सर्व्वसमाचारमत्यचारिषुः । तद्-कुलासु चानेकापदेशपूर्व्वमप्यचरन्नरेन्द्रच्छन्दानुपुरेषु चामी भिन्न कक्षेषु मन्दत्रासावल्लभसुखैरवर्त्तन्त सर्व्वाश्च कुलाङ्गनाजनः सुलभ भर्त्तृभावमकरोत् भ्रष्टचारित्रयवस्था स्पृहायापि न मयाभिता भर्त्तुर्न् धात्रमंशमवस्थान्यप्रक्षोभत् । तन्मूलाश्च कलहाः सामर्थ्याश्चोदभवन् आह्वन्यन्त दुर्व्वाला मर्त्तिभिः । अप्रहृतानि धनवतां धनानि तस्करा-दिभिः अपहृतपरिभूतयः प्रहृताश्च मातकप्रथाः हतनान्यवाः हत विद्या वधबन्धातुराश्च मुक्तकण्ठमाक्रोशन्मुक्तकण्ठ्यः प्रजाः दण्डधार यथाप्रणीतो भयकोपावजनयत् । ध्वस्तकुटुम्बेषु लोभः पदमधत्त विमानिताश्च तेजस्विनो मानेनादह्यन्त । तेषु तेषु चाशक्येषु प्रास-रन् परोपजापाः । तदा च अश्मकेन्द्रेणाक्रान्तवसन्तभानुना ...

रनपसारमार्गाः शुष्कतृणवंशगुल्माः प्रवेश्य द्वारतोऽग्निविसर्गैः व्याघ्रादिवधे प्रोत्साह्य तन्मुखपातनैः इरिणकूपपल्वलोत्पादनेनातिदूरसञ्चारितानां प्राणहारिभिः क्षुत्पिपासाभिवर्द्धनैः तृणगुल्मगूढश्वभ्रतटप्रदरपातहेतुभिः विषममार्गप्रधावनैः विषमुखीभिः क्षुरिकाभिः खरमुखकण्टकोद्धरणैः विष्वग्विसरविच्छिन्नानुयायितया एकाकीकृतानां यथेष्टघातनैः मृगदेशापराद्धे गमितैर्मोक्षणैः सम्पन्नबन्धमधिरुह्याद्रिशृङ्गाणि दुरधिरोहाण्यनन्यगतैः। प्रभ्रंशनैः। अटविकच्छन्नाविपिनेषु विरलसैनिकानां प्रतिरोधनैः [illegible]गुह्ययात्रोत्सवादिसम्मर्देषु बलवदनुप्रवेशनैः इतरेषां हिंसोत्पादनैः गूढोत्पादितकलहेभ्योऽप्रियाणि प्रकाशं भक्त्या साक्षिषु तद्विरुद्धाख्याकीर्त्तिगुप्तिहेतुभिः परायत्तैः परकलत्रेषु मुग्धत्वेनाभियोज्य जारान् भर्तॄनुभयं वा प्रहृत्य तत्तापहसोपन्यासयोग्यनारीहारितानां सङ्केतेषु प्रागुपनीय पश्चादभिगत्याकीर्णसंधिभिः प्रमापणैः उपप्रलोभ्य विषमप्रदेशेषु निधानखननेषु मन्त्रसाधनेषु च विघ्नव्याजसाध्येषूपपादनैः मत्तगजाधिरोहणाय प्रेर्य प्रत्यवायनिर्वर्तनैः व्यालहस्तिनं कोपयित्वा अवरोहितमुख्यमहत्त्वेषु अपक्रमणैः दायाद्यार्थं विवदमानानुपांशु हत्वा प्रतिपक्षेष्वयशःपातनैः सामन्तपुरजनपदेष्वयथावद्भूतानप्रकाशमभिप्रहृत्य तद्वैरिनामधेयाङ्कैः योग्याङ्गनाभिरहर्निशमभिरमय्य राजयक्ष्मोत्पादनैः वस्त्राभरणमाल्याङ्गरागादिषु रसविधानकौशलैः चिकित्सामुखेनामयोपवर्धनैरन्यैश्चाभ्युपायैः अश्मकेन्द्रप्रयुक्तास्तीक्ष्णरसदादयः प्रख्यापितप्रवीरमनन्तवर्मकटकं जर्जरमकुर्वन्।

अथ वसन्तभानुर्भानुवर्माणं नाम वानवास्यं प्रोत्साह्य अनन्तवर्मणा अयोधयत्। तत्परस्याद्रिराष्ट्रपर्यन्तश्चानन्तवर्मा समभिषेणुं बलसमुत्थानमकरोत्। सर्व्वसामन्तेभ्यश्चाश्मकेन्द्रः प्रागुपेत्यास्य प्रियतरोऽभूत्। अपरेऽपि सामन्ताः समगंसत गत्वा चाभ्यर्णे नर्मदारोधसि न्यविशत्। तस्मिंश्चावसरे महासामन्तस्य कुन्तलपतेरवन्तिदेवस्याग्रनाटकीयां [illegible] नाम चन्द्रपालितादिभिरति-

प्रशान्तस्वल्पकोशानामाश्रयानन्तवर्म्मा व्ययमसाक्षीत्। अतिरक्तश्च भुजङ्गवाग्मिनां मधुमत्तानाम्। अश्मकेन्द्रस्तु कुन्तलपतिमेत्यान्ते समभ्यधत्त प्रमत्तश्च राजा कथमपि न मां परास्यति किमत्यवस्था सोढव्या मम प्रतसन्धि पुरुषिणां पश्यतानि च ते सदारो सम्भूय मुरलेशं वीरसेनमृचीकेशमेकवीरं कोङ्कणपतिं कुमारगुप्तं नासिक्यनाथञ्च नागपालमुपजपामास। ते चाश्मकस्याविनयमसहमाना अस्मत्कृतेनैवोपवर्त्तेरन्। अपरञ्च वानवास्यः प्रियं मे मित्रममुनैव दुर्विनीतमस्मत्तोऽवतिष्ठस्व एवतः प्राग्वरेण कोशवाहनञ्च विभज्य गृह्णीमहीति। सुधेन चामुनाभ्युपेते विंशतिं वरांशुकानां पञ्चविंशतिं काञ्चनकुङ्कुमपर्णानां प्राभृतीकृत्यासमुखेन ते सामन्तैः सम्मन्त्र तानपि समतामवस्थापयत्। उत्तरेद्युश्चोभौ सामन्तानां वानवास्यस्य चानन्तवर्म्मा नयद्वेषादाभियानमग्रमत्। वसन्तभानुश्च तत्कोशवाहनमनन्तवर्म्मीयमात्माधिष्ठितमेव कृत्वा यथाप्रयासं यथाबलञ्च विभज्य गृह्णीत युद्धदर्पुस्तया येन केनचिदंशेनाहं तुष्यामीति शाठ्यात्सर्वानुवर्त्ती तैरेवाभियोक्तृनिमित्तीकृतैरुत्पादितकलहः सर्वसामन्तानध्वंसयत्। तदीयञ्च सर्व्वस्वं स्वयमेवाग्रसत्। वानवास्यं केनचिदंशेनानुगृह्य प्रत्याहृत्य सर्वमेवानन्तवर्म्मराज्यमात्मसादकरोत्।

अस्मिंश्चान्तरे मन्त्रिवृद्धो वसुरक्षितः कैश्चिन्मौलैः सम्भूय बालमेनं भास्करवर्म्माणम् अस्यैव ज्यायसीं भगिनीं अष्टवर्षां मञ्जुवादिनीम् अनयोश्च मातरं महादेवीं वसुन्धरामादायाप्रसर्पन्ना पदेऽस्या भाविनया दाहज्वरेण देहमजहात्। अस्मादृशैर्मौलैस्तु नीता माहिष्मतीं भर्तृद्वैमातुराय भ्रात्रे मित्रवर्म्मणे सापत्या देवी दर्शिताभूत्। साचाव्यांमनार्योऽसौ अन्ययाभ्यमन्यत निर्भर्त्सितश्च तया सुतमिममसहचारिणा राज्यार्थं चिकीर्षतीति नैर्घृण्यात् पापमेनं बालमभिघांसीत्। इदन्तु ज्ञात्वा देव्याहमाहूत तातं नाभीजक्षु जीवतानेनार्भकेण यत्र क्वचिदवधाय जीव जीवेयदिदहमपि एनमनुसरिष्यामि स्थापय मां क्षेमप्रवृत्तः स्ववार्त्तामिति। अहन्तु समुले

राजकुले कथञ्चिदेनं निर्गमय्य विन्ध्याटवीं व्यगाहिषि । पाद-चारदुःखितञ्चैनमाश्वासयितुं घोषे क्वचिदहानि कानिचिदक्रमय्य तत्रापि राजपुरुषसम्पातभीतो दूरमपासरं तत्रास्य दारकस्य पिपासा पीडितस्य वारि दातुकामः कूपेऽस्मिन्नपभ्रश्य पतित स्त्वयैवमनुगृहीत स्त्वमेवास्यातः परत्राणमेधि विश्ररक्षस्य राजसूनोरित्युदश्रुरभवत् ।

किमीया जात्यास्य मातेत्यनुयुक्ते मया अमुनोक्तं पाटलिपुत्रस्य वणिजो वैश्रवणस्य दुहितरि सागरदत्तायां कोशदासात् कुसुम धन्वनोऽस्य माता जातेति । यद्येवमेतन्मातुर्मे पितुश्चैको मातामह इति सर्वं एव तमहं सस्वजे । वृद्धेनोक्तं सिन्धुदत्तपुत्राणां कतमस्ते पितेति सुश्रुत इत्युक्ते सोऽभ्यहृष्यत् । अहन्तु तं समाश्वासिषम् अमात्यं नयेनैवोन्मूल्य बालमेनं पित्र्ये पदे प्रतिष्ठापयेयमिति प्रति-ज्ञाय कथमस्यैनां क्षुधं क्षपयेयमित्यचिन्तयम् । तावदापतितौ च कस्यापि व्याधस्य त्रीनिषूनतीत्य द्वौ मृगौ तच व्याधस्तस्य चापा-द्ववशिष्टमिषुद्वयं कोदण्डञ्चाछिद्यावधिषम् । एकश्च सपत्राकृतो-ऽन्यश्च निष्पत्राकृतोऽपतत् । तयोरेकं स्वयं दत्त्वा स्वयमपरेऽन्य-स्यापनीतत्वचः कोमामपोह्य निष्कुलाकृत्य पिशितोर्म्मांसिशिखीयादीनि शूलाकृत्य दावाङ्गारेषु तमेनाभिषिच्य तयोराश्रमस्थ क्षुधमपातार्षम् । एतस्मिन् कर्म्मणि मत्सौष्ठवेनातिहृष्टं किरातमस्मि पृष्टवान् । अपि जानासि माहिष्मतीवृत्तान्तमिति । असावाचष्ट तत्र आश्रवचो ह्यतोऽस्य विक्रीयाद्यैवागतः किं न जानासि प्रचण्डवर्म्मा नाम चण्ड वर्म्मानुजो मित्रवर्म्मदुहितरं मञ्जुवादिनीं विवाहु रभ्येतीति तेनोत्स-वोत्तरा पुरीति ।

अथ कर्णे जीर्णमब्रवं धूर्त्तोऽमित्रवर्म्मा दुहितरि सम्यक्प्रति-पन्ना मातरं विश्वास्य तन्मुखेन प्रत्याहृत्य बालकं जिघांसति तत् प्रतिगत्य कुशलमस्य महादत्तायै देव्यै रहोनिवेद्य पुनः कुमारः शार्दूलभक्षित इति प्रकाशमाक्रोशः कार्य्यः स दुर्म्मतिरन्तःप्रीतो बहिर्दुःखं दर्शयन् देवीमनुनेष्यति । पुनस्तया तन्मुखेन स वाच्यः

यदवेक्षया त्वन्मतमत्यर्थमिदं सोऽपि बाणः पापेन मे परलोक-
मगात् भवतु तदादेशकारिण्यौ भवाव इति। स तथोक्तः प्रीतिं
प्रतिपद्याभिप्रस्थास्यति। पुनरनेन वत्सनाभनाम्ना महाविषेण संसृज्य
तेनैव तत्र माल्यं मज्जयित्वा तया स वक्षसि मुखे च हन्तव्यः तथैवाय-
मसिप्रहारः पापीयसस्तव भवतु यद्यस्मि पतिव्रता पुनरनेनागदेन
सङ्क्षिप्तोऽप्यसि तां माल्यं मज्जयित्वा मद्दुहित्रे देया ततः तु तस्मिं-
स्तस्याश्च निर्विकारायां सत्यां सतीत्वं मेनां प्रकृतयोऽनुवर्त्तिष्यन्ते
पुनः प्रचण्डवर्म्मणो सन्देशम् अनायकमिदं राज्यमनेनैव सह वापि
सेयं स्वीकार्य्यमिति। तावदावां कापालिकवेषच्छन्नौ देव्या दीयमान-
भिक्षौ पुराद्बहिःश्मशाने वत्स्यावः पुनराज्ञां प्राप्य पौरवृद्धा-
नामात्यांश्च मन्त्रिवृद्धानेकान्ते ब्रवीतु देवी स्वप्नेऽद्य मे देव्या विन्ध्य-
वासिन्या कृतः प्रसादः अद्य चतुर्थेऽहनि प्रचण्डवर्म्मा मरिष्यति
पञ्चमेऽहनि रेवातटवर्त्तिनि मधुवने परीक्ष्य वेशन्तं जनेषु निर्गतेषु
कपाटमुद्घाट्य त्वत्सुतेन सह कोऽपि द्विजकुमारो निर्यास्यति। स
राज्यमिदमनुपाल्य त्वत्पुत्रमन्ते प्रतिष्ठापयिष्यति। स खलु वाचोमया
वाचोपचया तिरस्कृत्य स्थापितः। सा चेयं वत्सा मञ्जुवादिनी तस्य
द्विजातिदारकस्य दारत्वेनैव कल्पितेति। तदेतदतिरहस्यं युष्मा-
स्वेव गुप्तं तिष्ठतु यावदेतदुपपत्स्यत इति।

स साम्प्रतमतिप्रीतः प्रयातोऽर्थश्चायं यथाचिन्तितमनुष्ठितोऽ-
भूत्। प्रतिदिशञ्च लोकवादः प्रासर्पत्। अहो माहात्म्यं पतिव्रता-
नामसिप्रहार एव हि स माल्यप्रहारस्तस्मिन् जातो न प्राक्तमुपधि-
युक्तमेतत्कर्म्मेति वक्तुं यतस्तदेव दत्तं दाम दुहित्रे स्नानमण्डनमेव
तस्यै जातं न मृत्युः। योऽस्याः पतिव्रतायाः शासनमतिवर्त्तेत
स भस्मैव भवेदिति।

अथ महाव्रतिवेषेण माञ्च पुत्रञ्च भिक्षार्थं प्रविष्टौ दृष्ट्वा
प्रश्नतकामी प्रत्युत्थाय हर्षाकुलमब्रवीत्। भगवन्नयमञ्जलिरना-
थोऽयं जनोऽनुगृह्यतामस्मि मत्नीकः स्वप्नः स किं सत्यो भवेदिति। मयोक्तं

पणमस्याद्येव प्रज्ञासीति। यद्येवं वत्स भागधेयमस्यावेदास्याः स खल्वस्याः सनाभ्यंशो ऽप्रहति मद्दर्शनरागबद्धसाध्वसां मञ्जुवादिनीं प्रणमय्य भूयोऽपि सा स्वर्गगर्भमभूत तथेक्षिता सोऽयं युष्मदीयोवाचकमाणी श्वोमया निरोद्धव्य इति। मयापि स्मितं मञ्जुवादिनीरागदीनदृष्टिव्रीडधैर्य्येण एवमस्त्विति सम्भेदो नालीजङ्गमाकार्य्य निर्गम्य ततश्च तथानुयान्तं प्रनेरदृश्यम्। कासावस्थायुः प्रथितः प्रचण्डवर्म्मेति। सोऽभूत राज्यमिदं ममैव्यपाक्तप्राङ्गे राजास्थानमण्डप एव तिष्ठत्युपास्यमानः कुशीलवैरिति। यद्येव मुद्याने तिष्ठेति तं अरन्तमादिश्य तत्प्राकारैकपार्श्वे शूचिवृक्षमठिकायां भीषिताः समवतार्य्य तदध्यमनियुक्तराजपुत्रः शतकुशीलववेशशीलः प्रचण्डवर्म्मागमेव्यान्तरज्ञयम् अनुरञ्जितातपे तु समये जनसमाजोपयोगीनि संहृत्य स्वल्पगीतनाद्यवदितादिस्वरूपं समसमूढमादपादापीडदक्षिणकमलकरलङ्घनादीनि मत्स्योद्वर्त्तनादीनि च करणानि पुनरादायादायासन्नवर्त्तिनीं कुरिकाम्भाभिवर्षच्छुलवर्णां चित्रदुष्कराणि करणानि श्येनपातोत्क्रोशपातादीनि दर्शयन् विंशतिचापान्तरालावस्थितस्य प्रचण्डवर्म्मणः कुरिकयैकया प्रत्युरसं प्रहृत्य जीवादयंसदृशं वसन्तभानुरित्यभिगर्ज्जन् मद्वाजनुल्वणं मुद्गतासेः कस्यापि चारभटस्य पीवरांसवाजस्थितकरमाक्रम्य तावतैव तं विचेतो कुर्व्वन्नाकुलश्च लोकमुपरुकुर्व्वन् द्विपुरुषोच्छ्रितं प्राकारमत्यक्रयम् अवप्लुत्य चोपवने मदनुपातिनामेव मन्मा ह्यञ्जतइति ब्रुवाण एव नालीजङ्घसमीरितसेकतास्पृष्टमदन्यास्यया तमालवीथ्या चानुप्राकारं प्राचा प्रतिप्रधावितः पुनरवाचोचितस्तकचितत्वादलक्ष्यपातेन प्रसृत्य लङ्घितप्राकारव प्रख्यातवणयक्षस्यां शून्यमठिकायां तूर्णमेव प्रविश्य प्रतिमुक्तपूर्ववेषः सह कुमारेण मत्कर्म्मतुमुलराजदारदुःखवक्षवक्षां मकाणोद्धेशमध्यमाम्। प्रागेव तस्मिन् दुर्गागृहे प्रतिमाधिष्ठानमेव मया कृतं भग्नपार्श्वस्थैर्य्यस्थूलप्रकारस्थगितवाक्यद्वारं विलम्। अथ गच्छति मध्यरात्रे बसुंधरोपनीत-

महार्हरत्नभूषणपट्टनिवसनो सं विवरमार्गं प्रविश्य तूष्णीमतिष्ठाव।

देवी तु पूर्वेद्युरेव यथार्हमभिसंस्कारं मानवाय दत्त्वा प्रथम वर्म्मंबे पञ्चवर्म्मंशे च तामवस्थामस्मत्केन्द्रोपधिश्रुतामेव सन्दिश्य उत्तरेद्युः प्रत्युषस्येव पूर्वसङ्केतितपौरामात्यसामन्तवृद्धैः सहाम्बिका भगवतीमर्चयित्वा सर्वजनप्रत्यक्षं परीक्षितकुक्षिवेजन्धे तद्भवनं विधाय रक्षावृद्धैः सह जनेन स्थित्वा पटीयांसं पटहशब्दमकारयत्। अनन्तरं रन्ध्रप्रविष्टेन तेन नादेनाहं दत्तसंज्ञः शिरसैवोत्क्षिप्य सप्रतिमं क्षोदपादपीठमंसलभुजबलप्रयत्नदुःखलघुभयकारविधूतमेकपार्श्वमेकतोऽभिवेश्य निरगमं निरगमयञ्च कुमारम्। अथ यथापूर्वमर्चयित्वा दुर्गाम् उद्घाटितकपाटः प्रत्यक्षीभूय पश्यत्सु वृद्धवृद्धैः स्फुटरोमाञ्चमुद्यताञ्जलि स्फारविस्मयञ्च प्रणिपतन्तीः प्रकृतीरभ्यधाम् इत्थं देवी विन्ध्यवासिनी मन्मुखेन युष्मानाज्ञापयति। मया स कृपया शार्दूलरूपेण तिरस्कृत्याप यो दत्तस्तेनैव मय प्रत्यर्पितस्तमेनं मत्पुत्रं मामन्दमाख्यपयाद्य इति परिगृह्णन्तु भवन्तः। अपि च दुर्घटकूटकोटिघट्टनापाटवप्रकटशाठ्यस्फुटराक्षसकषटघट्टनाक्षमं मां मन्मथमस्य रक्षितारं रक्षाभिर्व्यञ्जयास्य सैयं सुभ्रूरभ्यनुज्ञाता मस्मनार्थयेति।

अथैतदाचो भाग्यवान् भोजवंशो यस्य त्वमार्य्यादत्तो नाथ इत्यप्रीयन्त प्रकृतयः। सा तु वाचामगोचरं हर्षावस्थामस्पृशन्मे श्वश्रूः तदहरेव च यथावदग्नाथयन्मञ्जुवादिनीपाणिपल्लवम्। प्रथमायाञ्च यामिन्यां सम्यगेव विश्वं प्रत्यपूरयम्। अनन्तरञ्च बालो मन्त्रमुष्टिचिन्तादिकायनैरभ्युपायान्तरप्रयुक्तैः दिष्ट्यागतामेव मम समर्थयमानो मदाज्ञां नात्यवर्त्तत। राजपुत्रस्यार्य्यापुत्र इति प्रभावहेतुः प्रसिद्धिरासीत्। तञ्च गुरुवद्भक्त्या भद्राक्षतमुपनाय्य पुरोहितेन पाठयन्नीतिं राजकार्याण्यन्वतिष्ठम्। अचिन्तयञ्च राज्यं नाम शक्तित्रयायत्तं शक्तयश्च मन्त्रप्रभावोत्साहाः परस्परानुगृहीताः कृत्येषु क्रमन्ते मन्त्रेण हि विनिश्चयोऽर्थानां प्रभावेण

प्रारम्भः उत्साहेन निर्व्यूढव्यम्। अतः पश्चात्कृतमन्त्रमूलो विरूढप्रभावस्कन्धश्चतुर्गुणोत्साहविटपो द्विसप्ततिप्रकृतिपत्त्रः षड्गुणकिसलयः शक्तिसिद्धिपुष्पफलश्च नयवनस्पतिर्नेतुरुपकरोतु। स चायमनेकाधिकरणत्वादसहायेन दुरुपजीवः। यस्त्वयमार्य्यकेतुर्नाम मित्रवर्म्ममन्त्री स कोशलाभिजनत्वात् कुमारमातृपक्षो मन्त्रिगुणैश्च युक्तस्तन्मतिमवमत्यैव ध्वस्तो मित्रवर्म्मा सचेक्षव्यः पेशलमित्यथ नात्ती अहं रहस्यभिध्यायम्। तात आर्य्यमार्य्यकेतुमेकान्ते ब्रूहि कोऽन्येष मायापुरुषो यदिमां राज्यलक्ष्मीमनुभवति सत्यायमस्मद्दासो भुजङ्गेनामुना परिगृहीतः किमुद्दीर्य्येत ग्रस्येत वेति। स यदादिशति तदस्मि चोध्य इति। सोऽन्यदेवं मामावेदयत्। सुश्रूषयास्य प्राश्रितैः प्रवर्त्त्य चित्राः कथाः संवाह्य पाणिपादमतिविश्रम्भाद्रहस्यं समप्राक्षं त्वदुपदिष्टेन नयेन। सोऽप्येवमकथयत् भद्र मैवं वादीरभिजनस्य शुद्धिर्दर्शनमसाधारणं बुद्धिनैपुणमतिमानुषं प्रायबलमपरिमाणमौदार्य्यमत्याश्चर्य्यमस्त्रेष्वश्रममनन्यं शिल्पस्थानमनुग्रहार्द्रं चेतस्तेजश्चाप्यपरविषह्यमभ्यमित्रीणमित्यस्मिन्नेव सन्निपातिता गुणा येऽन्यत्रैकैकशोऽपि दुर्लभाः द्विषतामेष चिरविस्पन्दमः प्रज्ञानान्तु चन्दनतरुः समुद्धृत्य नीतिशास्त्रान्यसमञ्जसमिमञ्च राजपुत्रं पित्र्ये पदे प्रतिष्ठितमेव विद्धि नात्र संशयः कार्य्य इति। तथापि श्रुत्वा भूयो भूयश्चोपधाभिर्विशोध्य तं मे मतिसहायमकरवम्। तत्सखश्च सत्यशौचयुक्तानमात्यान्विविधांश्चाशनांश्च गूढपुरुषानुदपादयम्। तेभ्यश्चोपलभ्य लुब्धसम्बद्धमलुब्धस्थितमविधेयप्रायञ्च प्रकृतिमण्डलमलुब्धतामभिविख्यापयन् धार्म्मिकत्वमुद्भावयन्नास्तिकान् कदर्थयन् कण्टकान् विशोधयन् अमित्रोपधीरपघ्नन् चातुर्वर्ण्यञ्च स्वधर्म्मकर्म्मसु स्थापयन् अभिसमाहरेयमर्थान् अर्थमूला हि दण्डविशिष्टकर्म्मारम्भाः नचान्यदस्ति पापिष्ठं तत्र दौर्बल्यादित्याकलय्य योगानन्वतिष्ठम्।

इति दण्डिनः कृतौ दशकुमारचरिते विश्रुतचरितं
नाम अष्टम उच्छ्वासः।